१००
६

अथ

100
6

ग्रन्थनामः-	"तर्क परिभाषा"	Tark paribhasha.
कर्तृनामः-	"केशवमिश्रः"	
विषयः-	न्यायशास्त्रम्	

751

७३४

१००/६

तर्कभाषाप्रारभ्यते

100/6

श्रीगणेशायनमः॥ बालोपियोन्यायनयेप्रवेशमल्पेनवांछत्यलसः श्रुतेन॥ संक्षिप्तयुक्त्यन्विततर्क
भाषाप्रकाश्यतेतस्यकृतेमयैषा॥१॥ प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्ण
यवादजल्पवितंडाहेत्वाभासछलजातिनिग्रहस्थानानांतत्वज्ञानान्निश्रेयसाधिगमइतिन्याय
स्यादिमंसूत्रं॥ अस्यार्थः॥ प्रमाणादिषोडशपदार्थानांतत्वज्ञानान्मोक्षप्राप्तिर्भवतीति। नचप्र
माणादीनांतत्वज्ञानंसम्यग्ज्ञानंतावद्भवति। यावदेषांउद्देशलक्षणपरीक्षानक्रियते। यदाहभा
ष्यकारः। त्रिविधाअस्यशास्त्रस्यप्रवृत्तिः। उद्देशोलक्षणंपरीक्षाचेति। उद्देशस्तुनाममात्रेणसंकी
र्तनं। नचास्मिन्नेवसूत्रेकृतं। लक्षणंतुअसाधारणधर्मवचनं यथागोःसास्नादिमत्वं। यथा
लक्षितस्यैतल्लक्षणमुपपद्यतेनवेतिविचारःपरीक्षा। तेनैवलक्षणपरीक्षितप्रमाणादीनांतत्वज्ञा
नार्थंकर्त्तव्या। तत्रापिप्रथममेवोद्दिष्टस्यप्रमाणस्यतावल्लक्षणमुच्यते। प्रमाकरणंप्रमाणं। अत्रच

ग्र

म

प्रमाणं लक्षयति प्रमाकरणं लक्षणं। ननु प्रमायाः करणं चेत्प्रमाणं तर्हि तस्य फलं वक्तव्यं। करणस्य फल
वत्वनियमात्। सत्यं प्रमैव फलं साध्यमिति सर्वः। यथा छिदाकरणस्य छिदैव फलं। का पुनः प्रमा। यस्याः
करणं प्रमाणं। उच्यते। यथार्थानुभवः प्रमा। यथार्थ इत्ययथार्थानां संशयविपर्ययतर्कज्ञानानां निरासः।
अनुभव इति स्मृतेर्निरासः। संस्कारजन्यं ज्ञानं स्मृतिः। अनुभवो नाम स्मृतिव्यतिरिक्तं ज्ञानं। किं पुनः
करणं। साधकतमं करणं। अतिशयितं साधकं साधकतमं। प्रकृष्टं कारकमिति यावत्। ननु साधकं कारण
मिति पर्यायः। तदेव न ज्ञायते किं तत्कारणमिति। उच्यते। यस्य कार्यात्पूर्वभावो नियतो ऽनन्यथासिद्ध
श्च तत्कारणं। यथा तंतुवेमादिकं पटस्य। यद्यपि पटोत्पत्तौ रासभादेर्दैवादागतस्य पूर्वभावो विद्यते
तथापि नासौ नियतः। तंतुरूपस्य नियतपूर्वभावोस्त्येव। किंतु अन्यथासिद्धः। पटरूपजननोपक्षीणत्वात्।
पटं प्रति कारणत्वे कल्पनागौरवात्। तेनानन्यथासिद्धनियतपूर्वभावित्वं कारणत्वं। अनन्यथासि

यत्सत्वेयत्सत्वंयद्व्यतिरेकेयद्व्यतिरेकस्तत्तस्यकारणमित्यर्थः।

कुनियतपश्चाद्भावित्वंकार्यत्वं।यत्तुकश्चिदाह।कार्यानुकृतान्वयव्यतिरेकिकारणमिति।तद्यु
क्तं।नित्यविभूनांव्योमादीनांकालतोदेशतश्चव्यतिरेकासंभवेनाकारणत्वप्रसंगात्।तच्चकारणं
त्रिविधं।समवाय्यसमवायिनिमित्तभेदात्।यत्रयत्समवेतंकार्यमुत्पद्यतेतत्समवायिकारणं।य
थातंतवःपटस्यसमवायिकारणं।तंतुष्वेवहिपटःसमवेतोजायतेनतुर्यादिषु।ननुतंतुसंबंधस्य
तुर्यादिसंबंधोपिपटस्याविद्यतेतत्कथंतंतुष्वेवहिपटःसमवेतोजायतेनतुर्यादिष्विति।सत्यं।
द्विविधःसंबंधः।संयोगसमवायश्चेति।तत्रायुतसिद्धयोःसंबंधःसमवायः।अन्ययोस्तुसंयो
गएव।कौपुनरयुतसिद्धौ।तदुक्तं।तावेवायुतसिद्धौद्वौविज्ञातव्यौययोर्द्वयोः।अवनश्यदेकम
पराश्रितमेवावतिष्ठते।यथावयवावयविनौगुणगुणिनौक्रियाक्रियावंतौजातिव्यक्तीवि

शेषनित्यद्रव्ये चेति।अवयवआदयोहियथाक्रमं अवयवाद्याश्रिताएवावतिष्ठंते।अविनश्यंतः।
विनश्यदवस्थास्त्वनाश्रिताएवावतिष्ठंते।यथातंतुनाशेसतिपटः।यथाआश्रयनाशेसतिगुणः।
विनश्यत्तातुविनाशकारणसामग्रीसान्निध्यं।तंतुपटावप्यवयवावयविनौ।तेनतयोःसंबंधःसम
वायइति।अयुतसिद्धत्वात्।तुरीपटयोस्तुनसमवायः।अयुतसिद्धत्वाभावात्।नतुरीपटाश्रितैवा
वतिष्ठते।नापिपटस्तुर्याश्रितः।अतस्तयोःसंयोगएव।तदेवंतंतुसमवेतःपटः।यत्समवेतंकार्यमुत्प
द्यतेतत्समवायिकारणं।अतस्तंतुरेवपटस्यसमवायिकारणं।नतुर्यादिकं।पटश्चस्वगतरूपादेःसम
वायिकारणं।एवंमृत्पिंडोघटस्यसमवायिकारणं।घटश्चस्वगतरूपादेः।ननुयदेवघटादयोजायंते
तदैवतद्गतरूपादयोजायंते।अतःसमानकालीनत्वाद्गुणगुणिनोःसव्येतरगोविषाणवत्कार्यकारण
भावएवनास्ति।एकस्यपौर्वापर्याभावात्।अतोरूपादीन्प्रतिनसमवायिकारणत्वंघटादीनां।कारणविशे

षत्वात्समवायिकारणस्य। उच्यते। न गुणगुणिनोः समानकालीनं जन्म। किंतु द्रव्यं निर्गुणमेव प्रथ
मं समुत्पद्यते। पश्चात्तत्समवेताः गुणाः समुत्पद्यंते। समानकालोत्पत्तौ तु गुणगुणिनोः समानसामग्री
कत्वात् भेदो न स्यात्। कारणस्ते दनियतत्वात्कार्यभेदस्य। तस्मात्प्रथमे क्षणे निर्गुण एव घटो गुणेभ्यः पूर्व
भावीति भवति गुणानां समवायिकारणं। तत्र कारणभेदोप्यस्ति। घटो हि घटं प्रति न कारणं। एकस्ये
व पौर्वापर्याभावात्। न हि स एव तमेव प्रति पूर्वभावी पश्चाद्भावी च भवति। स्वगुणान्प्रति तु पूर्वभावि
त्वाद्भवति गुणानां समवायिकारणं। नन्वेवं सति प्रथमे क्षणे घटोऽचाक्षुषः स्यात्। अरूपिद्रव्यत्वात्।
वायुवत्। तदेवं हि द्रव्यं चाक्षुषं भवति यन्महत्त्वे सति उद्भूतरूपवत्। अद्रव्यं वा स्यात्। गुणाश्रयत्वाभा
वात्। गुणाश्रयो द्रव्यमिति द्रव्यलक्षणं। स सं। [illegible]। प्रथमे क्षणे पर
मसूक्ष्मो यदि घटः चक्षुषा न गृह्यते तेन का नो हानिः स्यात्। न हि गुणोत्पत्तिपक्षेऽपि भिन्नेष्वावसरे घटः चक्षु
षा गृह्यते। तेन व्यवस्थितमेतत्। निर्गुण एव प्रथमं घटः उत्पद्यते। द्वितीयादिक्षणेषु चक्षुषा गृह्यते तेन

वप्रथमेक्षणे अद्रव्यत्वापत्तिः॥ समवायिकारणं द्रव्यं इति द्रव्यलक्षणयोगात् गुणाश्रयत्वं तु गुणात्वं तु भा
यसमवायिकारणप्रत्यासन्नमवधृतसामर्थ्यं तदसमवायिकारणं॥ यथा तंतुसंयोगः
पटस्यासमवायिकारणं॥ तंतुसंयोगस्य गुणस्य पटसमवायिकारणतंतुषु समवेत
त्वेन समवायिकारणप्रत्यासन्नत्वात्॥ अनन्यथासिद्धनियतपूर्ववर्तित्वेन पटं प्रति
कारणत्वाच्च॥ एवं तंतुरूपं पटगतरूपस्यासमवायिकारणं॥ ननु पटरूपस्य पटः
समवायिकारणं॥ तेन तद्गतस्यैवकस्यचिद्धर्मस्य पटरूपं प्रति असमवायिकारण
त्वं उचितं॥ तस्यैव समवायिकारणप्रत्यासन्नत्वात्॥ ननु तंतुरूपस्य॥ तस्य समवायिका
रणप्रत्यासन्नत्वाभावात्॥ समवायिकारणसमवायिकारणप्रत्यासन्नत्वस्यापि तंतु
रूपस्य परंपरयासमवायिकारणप्रत्यासन्नत्वात्॥ निमित्तकारणं तदुच्यते॥ यन्न सम

वायि असमवायिकारणं॥ ...समवायिकारणं॥

६४

वापि कारणं [illegible] नाप्यसमवायिकारणं अथ च कारणं [illegible] ॥ यथा वेमादिकं पट
स्य निमित्तकारणं ॥ तदेतत् भावानामेव त्रिविधं कारणं ॥ अभावस्य तु निमित्तकारणमात्रं ॥ त
स्य क्वचिदपि असमवायात् ॥ समवायस्य च भावद्वयधर्मत्वात् ॥ तदेतस्य त्रिविधकारणमध्ये
यदेव कथमपि सातिशयं कारणं तदेव करणं ॥ तेन व्यवस्थितमेतल्लक्षणं प्रमाकरणं प्र
माणमिति ॥ यत्तु अनधिगतार्थगंतृप्रमाणमिति लक्षणं ॥ तन्न ॥ एकस्मिन्नेव घटे घटोयं
घटोयमिति धारावाहिकज्ञानानां गृहीतग्राहिणामप्रामाण्यप्रसंगात् ॥ न चान्यान्य [illegible]
क्षणविशिष्टविषयीकरणादनधिगतार्थगंतृता ॥ प्रत्यक्षेण सूक्ष्मकालभेदानाकलनात् ॥
भेदग्रहे हि क्रियादिसंयोगांतानां चतुर्णां यौगपद्याभिमानो न स्यात् ॥ ननु प्रमायाः करणानिव

१ क्रियाक्रियातो विभागः ततः पूर्वदेशसंयोगनाशः ततउत्तरदेशसंयोगो) शतपत्रं कंटकेन युगपद्भिन्नमि
त्यादि: १
त्यादावपि शेषः १

णानि संति ॥ प्रमातृप्रमेयादीनि ॥ तान्यपि किं कारणानि ॥ उत नेति ॥ उच्यते ॥ सत्यपि प्रमातरि प्रमेये
च प्रमायां अनुत्पत्तेरिंद्रियसंयोगादौ तु सत्यविलंबेन प्रमोत्पत्तेरिति इंद्रियसंयोगादिरेव करणं ।
न प्रमात्रादि ॥ साधकत्वाविशेषेपि अनेनैवोत्कर्षेणास्य प्रमात्रादिभ्यो तिशयितत्वात् ॥ अतिशयि
तं साधकं साधकतमं ॥ तदेव करणमित्युक्तं ॥ अत इंद्रियसंयोगादिरेव प्रमाकरणत्वात् प्रमाणं ।
न प्रमात्रादिः ॥ तानि च प्रमाणानि चत्वारि ॥ तथा च न्यायसूत्रं ॥ प्रत्यक्षानुमानोपमानश
ब्दाः प्रमाणानि ॥ किं तत्प्रत्यक्षं ॥ साक्षात्कारिप्रमाकरणं प्रत्यक्षं ॥ साक्षात्कारिणी च प्रमा सै
वोच्यते ॥ येंद्रियजा ॥ सा च द्विविधा ॥ सविकल्पकनिर्विकल्पकभेदात् ॥ तस्याः करणं त्रिविधं ॥
कदाचिदिंद्रियं ॥ कदाचिदिंद्रियार्थसन्निकर्षः ॥ कदाचिज्ज्ञानं ॥ कदा पुनरिंद्रियं करणं ॥ उच्यते ।

॥५॥

यदा निर्विकल्पकरूपा प्रमा फलं ।। तदेंद्रियं करणं ।। तथा हि ।। आत्मा मनसा संयुज्यते मन इंद्रिये
णा इंद्रियमर्थेन ।। इंद्रियाणां वस्तुप्राप्यकारित्वनियमात् ।। ततोर्थसन्निकर्षेण इंद्रियेण निर्विक
ल्पकं नामजात्यादियोजनाहीनं वस्तुमात्रावगाहि किंचिदिदमिति ज्ञानं जन्यते ।। तस्य ज्ञानस्य
इंद्रियं करणं ।। छिदाया इव परशुः ।। इंद्रियार्थसन्निकर्षो वांतरव्यापारः ।। छिदाकरणस्य
परशोरिव दारुसंयोगः ।। निर्विकल्पकं ज्ञानं फलं ।। परशोरिव छिदा ।। कदा पुनरिंद्रियार्थस
न्निकर्षः करणं ।। यदा निर्विकल्पकानंतरं सविकल्पकं नामजात्यादियोजनात्मकं डित्थोयं ब्रा
ह्मणोयं श्यामोयमिति विशेषणविशेष्यभावावगाहि ज्ञानमुत्पद्यते ।। तदा इंद्रियार्थसन्निक
र्षः करणं ।। निर्विकल्पकं ज्ञानमवांतरव्यापारः ।। सविकल्पकं ज्ञानं फलं ।। कदा पुनर्ज्ञानं करणं ।। ॥५॥
यदा तु सविकल्पकानंतरं हानोपादानोपेक्षाबुद्धयो जायंते ।। तदा निर्विकल्पकं ज्ञानं करणं ।। =

१ कृष्णसर्पो हेयः ।। श्रीकृष्णमूर्त्यादिकमुपादेयं ।। लोष्ठादिकमुपेक्षणीयं मिति

विशेषणत्वेनज्ञानादिकमवगाहमाना॥१

सविकल्पकं ज्ञानं अवांतरव्यापारः॥ हानादिबुद्धिर्वा फलं॥ तज्जन्यस्तज्जन्यजनकोऽवांतरव्यापारः॥
यथा कुठारजन्यः कुठारदारुसंयोगः कुठारजन्यछिदाजनकः॥ कश्चिदाह॥ सविकल्पकादीना
मपि इंद्रियमेव करणं॥ यावंति त्वांतरालिकानि सन्निकर्षादीनि तानि सर्वाण्यवांतरव्यापाराः॥
इंद्रियार्थयोस्तु यः संबंधः साक्षात्कारिप्रमाहेतुः स षड्विधः॥ तद्यथा॥ संयोगः॥ संयुक्तस
मवायः॥ संयुक्तसमवेतसमवायः॥ समवायः॥ समवेतसमवायः॥ विशेषणविशेष्यभावश्चे
ति॥ यदा चक्षुषा घटविषयं ज्ञानं जन्यते तदा चक्षुरिंद्रियं॥ घटोर्थः॥ अनयोः सन्निकर्षः संयोग
एव॥ अयुतसिद्धत्वाभावात॥ एवं मनसा इंद्रियेण यदा आत्मविषयं ज्ञानं जन्यते। अहमि
ति। तदा मन इंद्रियं॥ आत्मा अर्थः॥ अनयोः सन्निकर्षः संयोग एव॥ यदा चक्षुषा घटगतरूपा
दिकं गृह्यते॥ घटे श्यामं रूपं अस्ति॥ तदा चक्षुरिंद्रियं॥ घटगतरूपमर्थः॥ अनयोः सन्निकर्षः

संयुक्तसमवाय एव॥ चक्षुःसंयुक्ते घटे रूपस्य समवायात्॥ एवं मनसा आत्मसमवेते सुखादौ गृह्यमाणे।
मन इंद्रियं॥ आत्मसमवेतसुखादिकमर्थः॥ अनयोः सन्निकर्षः संयुक्तसमवायः॥ घटगतपरि
माणादिग्रहे चतुष्टयसन्निकर्षोप्यधिकं कारणमिष्यते॥ सत्यपि संयुक्तसमवाये तदभावे दूरेप
रिमाणाद्यग्रहणात्॥ चतुष्टयसन्निकर्षो यथा॥ इंद्रियावयवैरर्थावयवानां॥ इंद्रियावयवि
नाऽर्थावयविनः॥ इंद्रियावयवैरर्थावयविनः॥ इंद्रियावयविनाऽर्थावयवानां संयोग इति।
कदापुनः संयुक्तसमवेतसमवायः सन्निकर्षः॥ यदा पुनश्चक्षुषा घटगतरूपादिसमवेतं रूप
त्वादिसामान्यं गृह्यते॥ तदा चक्षुरिंद्रियं॥ रूपत्वादिसामान्यमर्थः॥ अनयोः सन्निकर्षः सं
युक्तसमवेतसमवायः। चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात्॥ कदापुनः
समवायसन्निकर्षः॥ यदा श्रोत्रेंद्रियेण शब्दो गृह्यते॥ तदा श्रोत्रमिंद्रियं शब्दोऽर्थः॥ अनयोः सन्नि

त्वा

कर्षः समवाय एव॥ कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रं॥ श्रोत्रस्य आकाशात्मकत्वात्॥ शब्दस्य
च आकाशगुणत्वात्॥ गुणगुणिनोः समवाय एव॥ कदा पुनः समवेतसमवायः सन्निकर्षः॥
यदा पुनः शब्दसमवेतं शब्दत्वादिसामान्यं श्रोत्रेंद्रियेण गृह्यते॥ तदा श्रोत्रमिंद्रियं॥ शब्दत्वादि
सामान्यमर्थः॥ अनयोः सन्निकर्षः समवेतसमवाय एव॥ श्रोत्रसमवेते शब्दे शब्दत्वस्य समवा
यात्॥ कदा पुनर्विशेषणविशेष्यभाव इंद्रियार्थसन्निकर्षः॥ यदा चक्षुःसंयुक्ते भूतले घटाभावो
गृह्यते॥ इह भूतले घटो नास्तीति॥ तदा चक्षुःसंयुक्तस्य भूत लस्य घटाभावो विशेष्यं भूतलं वि
शेषणं॥ यदा तु भूतलं घटशून्यमिति प्रतीतिस्तदा चक्षुःसंयुक्ते भूले घटाभावो विशेषणं॥
भूतलं विशेष्यं॥ यदा पुनर्मनःसंयुक्ते आत्मनि सुखाद्यभावो गृह्यते अहं सुखादिरहित इति॥ तदा म
नःसंयुक्तस्य आत्मनः सुखाद्यभावो विशेषणं॥ यदा श्रोत्रसमवेते गकारे घत्वाभावो गृह्यते तदा श्रोत्र

[illegible] सत [illegible]

५अबाधितार्थकत्वात् ५ स्वलक्षणं [illegible] विषयः गोचरं यस्य निर्विकल्पक सब ६ ।

तर्क॰ ५

समवेतस्य घटकारस्य घत्वाभावो विशेषणं ॥ तदेवं संक्षेपतः पंचविधसंबंधान्यतमसंबंधेन विशेषण
विशेष्यभावलक्षणेन इंद्रियार्थसन्निकर्षेणाभाव इंद्रियेण गृह्यते । एवं समवायोपि वस्तुसंबंधस्यतंतो
र्विशेषणविशेष्यभूततः पटसमवायो गृह्यते । इह तंतुषु पटसमवाय इति । तदेवं षोढासंनिकर्षो वर्णि
तः । संग्रहश्च । अक्षजा प्रमितिर्द्वेधा सविकल्पा [illegible]विकल्पिका ॥ करणं त्रिविधं तस्याः सन्निकर्षस्तु ष
ड्विधः ॥ १ ॥ ननु निर्विकल्पकं परमार्थस्वलक्षणविषयं भवतु प्रत्यक्षं । सविकल्पकं तु न । तल्लिंगव
दनुगताकारावगाहित्वात् सामान्यविषयं प्रत्यक्षं ॥ अर्थजस्यैव प्रत्यक्षत्वात् ॥ अर्थस्य तु परमार्थ
सत एव जनकत्वात् । स्वलक्षणं तु परमार्थसत् । न तु सामान्यं । तस्य प्रमाणनिरस्तविधिभावस्या
न्यव्यावृत्त्यात्मक[illegible]त्वात् । मैवं । सामान्यस्यापि वस्तुभूतत्वात् । तदेवं व्याख्यातं प्रत्यक्षं ॥ ७ ॥
॥ ॥ इति प्रत्यक्षं समाप्तं ॥ अथानुमानप्रमाणमिदानीं निरूप्यते ॥ किं तदनुमानं ॥ छ ॥

तः (left margin) — विधं (right margin)

कथं ४

राम ५

लिंगपरामर्शोऽनुमानं। येनानुमीयते तदनुमानं लिंगपरामर्शेन चानुमीयते। अतो लिंगपराम
र्शोऽनुमानं। तच्च धूमादिज्ञानं। अनुमितिं प्रति कारणत्वात् अग्न्यादिज्ञानं अनुमितिः तत्करणं धू
मादिज्ञानं। किं पुनर्लिंगं। कश्च तस्य परामर्शः। व्याप्तिबलेन अर्थगमकं लिंगं। तथाहि। यत्र धूम
स्तत्राग्निरिति साहचर्यनियमो व्याप्तिः। तस्यां गृहीतायामेव [illegible] धूमोग्निं गमयति। अतो व्या
प्तिबलेनाग्न्यनुमापकत्वात् धूमोग्नेर्लिंगं। तस्य तृतीयं ज्ञानं लिंगपरामर्शः। तथाहि। प्रथमं ता
वत् महानसादौ भूयो भूयो धूमं पश्यन् वह्निं पश्यति तेन भूयोदर्शनेन धूमाग्न्योः स्वाभाविक संबं
धमवधारयति। यत्र धूमस्तत्राग्निरिति। यद्यपि यत्र [illegible] मैत्रीतनयत्वं [illegible] तत्र श्यामत्वमि
ति भूयोदर्शनं समानं। तथापि मैत्रीतनयत्वश्यामत्वयोर्न स्वाभाविक संबंधः। किंतु औपाधिक एव।
शाकाद्यन्नपरिणा[illegible]मस्योपाधेर्विद्यमानत्वात्। तथाहि श्यामत्वे मैत्रीतनयत्वं न प्रयोजकं॥

हार रित्स्क त्यौ२५

किंतुशाकाद्यन्नपरिणतिभेदएवप्रयोजकः।प्रयोजकश्चोपाधिरुच्यते।नचधूमाग्न्योःसंबंधेकश्चिदुपाधिर
स्ति।अस्तिचेद्योग्योवाअयोग्योवा।अयोग्यस्यशंकितुमशक्यत्वात्।योग्यस्यचानुपलभ्यमानात्॥
यत्रोपाधिरस्तितत्रोपलभ्यते।यथाअग्नेर्धूमसंबंधेआर्द्रेंधनसंयोगः।हिंसात्वस्यचअधर्मसाधन
त्वेनसहसंबंधेनिषिद्धत्वमुपाधिः।मैत्रीतनयस्यचश्यामत्वेनसहसंबंधेशाकाद्यन्नपरिणतिभेदः॥
नचधूमाग्न्योःसाहचर्येकश्चिदुपाधिरस्ति।यद्यपिविप्रकृष्टदेशस्यदर्शनाभावान्नास्तीतितर्कसंमतो
सहकारिणाअनुपलंभसनाथेनप्रत्यक्षेणोपाध्यभावोऽवधार्यते।तथाचउपाध्यभावग्रहण
जनितसंस्कारसहकृतेनभूयोदर्शनजनितसंस्कारसहकृतेनसाहचर्यग्राहिणाप्रत्यक्षेणैवधूमाग्न्यो
र्व्याप्तिरवधार्यते।तेनधूमाग्न्योःस्वाभाविकःसंबंधोनतुऔपाधिकः।स्वाभाविकसंबंधोव्याप्तिरि
त्युच्यते।प्रदर्शितेनन्यायेनधूमाग्न्योर्व्याप्तौगृह्यमाणायां।महानसेयद्धूमस्तानंतरप्रथमं।पर्वतादौपक्षे

व त नाम ८

यद्धूमज्ञानं तद्द्वितीयं। ततः पूर्वं गृहीतां धूमाग्न्योर्व्याप्तिं स्मृत्वा तत्रैव पर्वते पुनर्धूमं परामृ-

ना शति। अस्मिन्पर्वते वह्निव्याप्यो धूम इति तदेतद्धूमज्ञानं तृतीयं। एतच्चावश्यमभ्युपेयं।

अन्यथा यत्र धूमस्तत्राग्निरित्येव स्यात्। इह तु कथं अग्निना भवितव्यं। तस्मादिहापि धूमो-

ऽस्तीति ज्ञानं अन्वेषितव्यं॥ अयमेव लिंगपरामर्शः। अनुमितिं करणत्वाच्चानुमानं॥ तस्मादस्य प्रति

पर्वतेऽग्निरिति अनुमितिज्ञानमुत्पद्यते॥ ननु [illegible] यत्र प्रथमं महानसे धूमज्ञानं तत्राग्न्यनुमा कथं

पकं [illegible]॥ सत्यं। व्याप्तेरगृहीतत्वात्। गृहीतायामेव व्याप्तावनुमित्युदयात्। अथ व्याप्तिनिश्चयो-

त्तरकालं महानसे एवाग्निरनुमीयतां॥ मैवं। अग्नेर्दृष्टत्वेन संदेहाभावात्। संदिग्धश्चार्थोऽनुमी-

यते। यथोक्तं भाष्यकृता। नानुपलब्धे न निर्णीतेर्थे न्यायः प्रवर्तते। अपितु संदिग्धेर्थे। अयं पर्वत

उपलब्ध्यभावात्तावोपलब्धिः २ अनुमानं २

तर्क०
२

त
गृमात्रे[illegible]स्यपुंसो यद्धूमज्ञानं तत्कथं नाग्निं अनुमापयति। अस्ति वाग्निर्नवेति संदेहः। साधकबाधक
प्रमाणाभावेन संशयस्य न्याय्यत्वात्। सत्यं। अगृहीतव्याप्तेरिव गृहीतविस्मृतव्याप्तेरपि पुंसो
नुमानानुदयेन व्याप्तिस्मृतेरपि अनुमितिहेतुत्वात्। धूमदर्शनादुद्बुद्धसंस्कारो व्याप्तिं स्मरति॥
योयो धूमवान् सोसो अग्निमान् यथा महानस इति। तेन धूमदर्शने जाते व्याप्तिस्मृतौ जातायां पक्ष
धर्मताज्ञानं तृतीयं। वह्निव्याप्यधूमवांश्चायमिति। तदेवाग्निमनुमापयति नान्यत्॥ तदेव
लिंगपरामर्शः। तेन व्यवस्थितमेतत् लिंगपरामर्शोनुमानमिति लक्षणं॥ तच्चानुमानं द्विवि
धं॥ स्वार्थं परार्थं चेति। स्वप्रतिपत्तिहेतुः स्वार्थं। तथाहि। स्वयमेव महानसादौ विशिष्टप्रत्य
क्षेण धूमाग्न्योर्व्याप्तिं गृहीत्वा पर्वतसमीपं गतः तद्गते चाग्नौ संदिहानः पर्वतवर्तिनीमविच्छिन्नमू

ज्ञानं

घो

लां अग्निं लिहां धूमलेख्यां पश्यन्धूमदर्शनोद्बुद्धसंस्कारो व्याप्तिं स्मरति। यत्र धूमस्तत्राग्निरिति।
ततोऽत्रापि पर्वते अग्निना व्या[illegible] धूमोऽस्तीति प्रतिपद्यते। तस्मादत्र पर्वते वह्निरस्तीति स्वयमेव प्र
तिपद्यते। तत्स्वार्थानुमानं। यत्तु कश्चि[illegible] स्वयं धूमादग्निमनुमाय परबोधयितुं पंचावयवोपेतं वाक्यं
प्रयुंक्ते। तत्परार्थानुमानं॥ तद्यथा। पर्वतो[illegible]ग्निमान् धूमवत्वात्। इति हेतुः। योऽग्निमान् सो धू
मेवान्यथा महानस इत्युदाहरणं। तथा चायमित्युपनयः। तस्मात्तथेति [illegible] निगमनं॥ अनेन वाक्ये
न प्रतिपादितात् पंचावयवोपपन्नाल्लिंगात्परोप्यग्निं प्रतिपद्यते। तेनैतत्परार्थानुमानं॥ अत्र पर
र्वतस्य अग्निमत्वं साध्यं। धूमवत्वं हेतुः। स चान्वयव्यतिरेकी। अन्वयेन व्यतिरेकेण च व्याप्तेः सत्वात्।
तथाहि। यत्र धूमस्तत्राग्निर्यथा महानस इत्यन्वयव्याप्तिः। महानसे धूमाग्न्योरन्वयसद्भावदर्श
नात्। एवं यत्राग्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिः। महाह्रदे धूमाग्न्यो

यौ

य

अभावः।

व्यतिरेकव्याप्तिः।
व्यतिरेकव्याप्तौ

व्यतिरेकस्य सद्भाववदर्शनात्। व्यतिरेकव्याप्तेरयं क्रमः। अन्वयव्याप्तौ यद्व्याप्यं तदभावोऽत्र व्यापकः।
यच्च व्यापकं तदभावोऽत्र व्याप्य इति। तदुक्तं। व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते। तयोरभा
वयोस्तस्माद्विपरीतः प्रतीयते। अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते। साध्याभावोऽन्यथा व्याप्यो
व्यापकः साधनात्ययः। व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परं। एवं परीक्षिता व्याप्तिः स्फुटीभ
वति तत्त्वतः।। २।। तदेवं धूमत्वे हेतौ अन्वयेन व्यतिरेकेण च व्याप्तिरस्ति। यत्तु वाक्ये केवलमन्वयव्याप्तिरे
व प्रदर्शिता तदेकेनापि चरितार्थत्वात्। तत्रापि अन्वयस्यावक्रत्वात् प्रदर्शनं। ऋजुमार्गेण सिद्ध्यतोऽर्थस्य
वक्रेण साधनायोगात्। न तु व्यतिरेकव्याप्तेरभावात्। तदेवं धूमवत्त्वं हेतुः अन्वयव्यतिरेकी। अन्येऽपि
अनित्यत्वादौ हेतवोऽन्वयव्यतिरेकिणो द्रष्टव्याः। कश्चिदन्यो हेतुः केवलव्यतिरेकी। तद्यथा सात्म
कत्वे साध्ये प्राणादिमत्त्वं हेतुः। तथा हि। जीवच्छरीरं सात्मकं प्राणादिमत्त्वात्। यत्सात्मकं न भवति तत्प्राणादि

साध्ये कृतकत्वादयो २

मे

मन्न भवति। यथा घटः। न चेदं जीवच्छरीरं तथा तस्मान्न तथेति। अत्र जीवच्छरीरस्य सात्मकत्वं साध्यं
प्राणादिमत्वं हेतुः। स च केवलव्यतिरेकी अन्वयव्याप्तेरभावात्। तथा हि। यत्प्राणादिमत्तत्सात्मकं यथा
अमुक इति दृष्टांतो नास्ति। जीवच्छरीरं सर्वं पक्ष एव। लक्षणमपि केवलव्यतिरेकी हेतुः। यथा गंधवत्वं पृ
थिवीलक्षणं। विवादास्पदं पृथिवीति व्यवहर्त्तव्यं गंधवत्वात्। यन्न पृथिवीति व्यवह्रियते न तद्गंधवद्य
था आपः। प्रमाणलक्षणं वा। यथा प्रमाकरणत्वं। तथा हि। प्रत्यक्षादि प्रमाणमिति व्यवहर्त्तव्यं। प्रमाकर
णत्वात्। यत्प्रमाणमिति न व्यवह्रियते तन्न प्रमाकरणं यथा प्रत्यक्षाभासादि। इदं पुनर्यत् प्रमाकरणं तत्प्र
माणमिति व्यवहर्त्तव्यं यथा अमुक इत्यन्वयदृष्टांतो नास्ति। प्रमाणमात्रस्य पक्षीकृतत्वात्। अत्र च व्य
वहारः साध्यो न तु प्रमाणत्वं। तस्य प्रमाकरणत्वाद्धेतोरभेदेन साध्याभेददोषप्रसंगात्। तदेवं केवलव्यति
रेकिणो दर्शिताः। कश्चिद्धेतुः केवलान्वयी। तथा हि। विशेषो अभिधेयः प्रमेयत्वात्। यत्प्रमेयं तदभिधेयं

एव ८

यथा घटः। तथा चायं। तस्मात्तथेति। अत्र विशेषस्य अभिधेयत्वं साध्यं प्रमेयत्वं हेतुः स च केवलान्वयी। यद
भिधेयं न भवति तत्प्रमेयं न भवति यथा अमुक इति दृष्टांताभावात्। सर्वत्र हि प्रमाणिकं अर्थो दृष्टांतः॥
सर्वप्रमेयस्याभिधेयत्वेति। एतेषां चान्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि हेतूनां त्रयाणां मध्ये
यो हेतुरन्वयव्यतिरेकी स पंचरूपोपपन्न एव स्वसाध्यं साधयितुं क्षमते। नत्वेकेनापि रूपेण हीनः॥ ता
नि च पंचरूपाणि पक्षधर्मत्वं सपक्षे सत्वं विपक्षाद्व्यावृत्तिः अबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति। एता त्वं
नि पंचरूपाणि धूमवत्वादौ अन्वयव्यतिरेकिणि हेतौ विद्यंते॥ तथाहि। धूमवत्वं पक्षस्य पर्वतस्य धर्मः।
पर्वते तस्य विद्यमानत्वात्। एवं सपक्षे सत्वं। सपक्षे महानसेपि विद्यते इत्यर्थः। विपक्षान्महाह्रदाद्व्यावृ
त्तिः स्तत्र नास्तीत्यर्थः। एवं अबाधितविषयत्वं। धूमवत्वस्य हेतोर्विषयः साध्यो धर्मस्तच्चाग्निमत्वं।
तत्केनापि प्रमाणेन न बाधितं। न खंडितमित्यर्थः। एवमसत्प्रतिपक्षोऽस्येति असत्प्रतिपक्षं धूमवत्वं

पि

तथाहि। साध्यविपरीतसाधकं हेत्वंतरं [illegible]प्रतिपक्ष इत्युच्यते। स च धूमवत्वे हेतौ नास्त्येव। अनुप
लंभात्। तदेवं पंचापि रूपाणि धूमवत्वे हेतौ विद्यंते। तेनैतद्धूमवत्वं अग्निमत्वस्य गमकं। अग्निमत्व
स्य साधकं। अग्नेः पक्षसंबंधित्वं तु हेतोः पक्षधर्मताबलाल्लभ्यते। तथाहि। अनुमानस्य द्वे अंगे। व्या
प्तिः पक्षधर्मता च। तत्र व्याप्त्या साध्यसामान्यसिद्धिः। पक्षधर्मताबलात्साध्यस्य पक्षसंबंधित्वं वि
शेषः सिध्यति। पक्षधर्मतया धूमवत्वेन वह्निः पर्वतसंबंधी एवानुमीयते। अन्यथा साध्यसामान्य
स्य व्याप्तिग्राहकादेव सिद्धेः। किं कृतमनुमानेन। यस्तु अन्योपि अन्वयव्यतिरेकी हेतुः। स सर्वः पंच
रूपोपपन्न एव सद्धेतुः। अन्यथा हेत्वाभासोऽहेतुरिति यावत्। केवलान्वयी चतूरूपोपपन्न एव स्व
साध्यं साधयति। तस्य हि विपक्षाद्व्यावृत्तिर्नास्ति विपक्षाभावात्। केवलव्यतिरेक्यपि चतूरूपो
पपन्न एव। तस्य हि सपक्षे सत्वं नास्ति सपक्षाभावात्। के पुनः पक्षसपक्षविपक्षाः। उच्यंते ॥

तत्र असिद्धस्त्रिविधः। आश्रयासिद्धस्वरूपासिद्धव्याप्यत्वासिद्धश्च। ४

४ हेतुलक्षणरहिता हेतुवदवभासमाना हेत्वाभासाः।

संदिग्धसाध्यधर्मा धर्मी पक्षः। यथा धूमानुमाने पर्वतः। सपक्षस्तु निश्चितसाध्यधर्मा धर्मी यथा
तत्रैव धूमानुमाने महानसः। विपक्षस्तु निश्चितसाध्याभाववान् धर्मी यथा तत्रैव महाह्रद इति।
तदेवमन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकिणस्त्रयोपि हेतवो दर्शिताः। तोन्यहेतवो हे तो
त्वाभासाः संप्रति वक्ष्यन्ते। ते चासिद्धविरुद्धानैकान्तिकप्रकरणसमकालात्ययापदिष्टभेदात्पञ्चैव।
तत्र लिंगत्वेनानिश्चितपक्षवृत्तिरसिद्धः। यथा। गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंदवत्।
अत्र हि गगनारविंदमाश्रयः। स च नास्त्येव। स्वरूपासिद्धो यथा। शब्दोनित्यश्चाक्षुषत्वात्। घट
वत्। अत्र चाक्षुषत्वं हेतुः। स च शब्दे नास्त्येव। शब्दस्य श्रावणत्वात्। व्याप्यत्वासिद्धस्तु द्विधा। ए
को व्याप्तिग्राहकप्रमाणाभावात्। अपरस्तु उपाधिसद्भावात्। तत्र प्रथमो यथा। यत्सत्तत्क्षणि
कं। यथा घनः। संश्च शब्दा [illegible] नं वसलक्षणिकत्वयोर्व्याप्तिग्राहकं प्रमाणमस्ति। सोपाधिकतया

दि:। शब्दा ५ व्याप्तिरसिद्धिः ३

अभ्युपेतं

सत्वस्य व्याप्यत्वासिद्धावुच्यमानानां क्षणिकत्वमन्यप्रयुक्तं [illegible] स्यात्। द्वितीयो यथा। क्रत्वं
तर्वर्त्तिनी हिंसा अधर्मसाधिका हिंसात्वात्। क्रतुबाह्यहिंसावत्। अत्र हि अधर्मत्वे साध्ये हिंसात्वं न प्रयो
जकं। किंतु निषिद्धत्वमेव प्रयोजकं। उपाधिरितियावत्। तथाहि। साध्यव्यापकत्वे सति साधनाव्या
पकत्वमुपाधिरिति उपाधिलक्षणं। तच्चास्मिन्निषिद्धत्वे वर्त्तते निषिद्धं हि साध्यस्याधर्मस्य व्यापकं। यत्र त्वं
साधन यत्राधर्मत्वं तत्र तत्रावश्यं निषिद्धत्वं। एवं साधनं हिंसात्वं न व्याप्नोति निषिद्धता। न हि यत्र यत्र हिंसा
त्वं तत्र तत्रावश्यं निषिद्धत्वं। यज्ञीयपशुहिंसायां निषिद्धत्वाभावात्। तस्मादन्यप्रयुक्तं व्याप्त्युप
जीविहिंसात्वं व्याप्यत्वासिद्धमेव। साध्यविपर्ययव्याप्तहेतुर्विरुद्धः। स यथा। शब्दो नित्यः कृतकत्वात्। यो
अत्र भवतोक्तं कृतकत्वं साध्य[illegible]विपरीतानित्यत्वेन व्याप्तं। [illegible]यत्कृतकं तदनित्य[illegible]। [illegible]त्यमित्यतो विरु

हि

अधी ३

तर्कं०
१२

स्त.४

दुं [struck through] । सव्यभिचारोनैकांतिकः । सद्विविधः । साधारणोनैकांतिकः । असाधारणोनैकांतिकश्चात
त्रपक्षादित्रयवृत्तिः साधारणः । सयथा । शब्दोनित्यः प्रमेयत्वात् । व्योमवत् । अत्र प्रमेयत्वं हेतुःस्तु नित्यानि
त्यवृत्तिः । पक्षसपक्षा [blotted] व्यावृत्तः । पक्षमात्रवृत्तिर्यो साधारणोनैकांतिकः । सयथा ।
भूर्नित्या गंधवत्वात् । गंधवत्वं सपक्षान्नित्याद्विपक्षात्‌नित्याद्व्यावृत्तं भूमात्रवृत्ति । प्रकरणसमोसएव ।
यस्यहेतोः साध्यविपरीतसाधकं हेत्वंतरं विद्यते । यथा अनित्यश्शब्दो नित्यधर्मरहितत्वात् । नित्यःश
ब्दो अनित्यधर्मरहितत्वादिति । अयमेव सत्प्रतिपक्ष इत्युच्यते । पक्षेप्रमाणांतरावधृतसाध्याभावो हेतु
र्बाधितविषयः कालात्ययापदिष्ट इत्युच्यते । अग्निरनुष्णः कृतकत्वात् । जलवत् । तत्रहि कृतकत्वस्य
हेतोः साध्यमनुष्णत्वं । तदभावः प्रत्यक्षेणैवावधारितः । स्पार्शनप्रत्यक्षेणोष्णत्वोपलंभात् । इतिव्याख्यात
मनुमानं

स
ये:
चा

नि ३

नाम
१३

सादृश्यं तस्य वाक्यमित्यर्थः।

इदानीमुपमानं निरूप्यते अतिदेशवाक्यार्थस्मरणसहकृत[illegible] सादृश्यविशिष्टपिंडज्ञानमुपमानं।
यथा गवयमजानन्नपि यथा गौस्तथा गवय इति कुतश्चित् आरण्यकपुरुषात् श्रुत्वा वनं गतो वाक्या
र्थस्मरन्यत्र गोसादृश्यविशिष्टं पिंडं पश्यति। तदा तद्वाक्यार्थस्मरणसहकृतं गोसादृश्यविशिष्टपि
ंडज्ञानमुपमानं। उपमितिं प्रतिकरणत्वात्। उपमितिस्तु सा। या गोसादृश्यविशिष्टपिंडदर्शना
नंतरं असौ गवयशब्दवाच्यः पिंड इति संज्ञासंज्ञिसंबंधप्रतीतिः सैव फलं। इदं तु प्रत्यक्षानु
मानासाध्यत्वात् प्रमासाधकत्वात् प्रमाणांतरमुपमाख्यं आक्षिपति। तदेवं व्याख्यातमुपमानं।
शब्दो निरू[illegible]प्यते। आप्तवाक्यं शब्दः। आप्त[illegible]स्तु यथाभूतार्थस्योपदेष्टा पुरुषः॥
वाक्यं तु आकांक्षायोग्यतासंनिधिमतां पदानां समूहः। अत एव गौरश्वः पुरुषो हस्तीति पदा
नि न वाक्यं।

त्वा

त

परस्पराकांक्षाविरहात्। अग्निना सिंचेदिति न वाक्यं। योग्यताविरहात्। न हि अग्निसेकयोः परस्प
रान्वययोग्यतास्ति। तथाहि। अग्निनेति तृतीयासेकरूपं कार्यं प्रति करणत्वमग्नेः प्रतिपादितं।
न चाग्निः सेकं करणीभवितुं योग्यः। तेन कार्यकारणभावलक्षणसंबंधोऽग्निसेकयोरयोग्यत्वात्।
अग्निना सिंचेदिति न वाक्यं। एवमेकैकशः प्रहरे प्रहरे ऽसहोच्चारितानि गामानय शुक्लां दंडेनेत्यादि
पदानि न वाक्यं। सत्यामपि परस्पराकांक्षायां सत्यामपि च परस्परान्वययोग्यतायां परस्परं सान्नि
ध्याभावात्। यानि त्वाकांक्षायोग्यतासन्निधिमंति पदानि तान्येव वाक्यं। यथा ज्योतिष्टोमेन स्वर्गका
मो यजेतेत्यादि। यथा वा नदीतीरे पंच फलानि संतीति। यथा वा तान्येव गामानयेत्यादिपदानि अवि
लंबेनोच्चारितानि। ननु अत्र पदानि न साकांक्षाणि किं त्वर्थाः फलादीनां आधेयानां तीराद्याधा
राकांक्षितत्वात्। न च विचार्यमाणेऽर्थापि साकांक्षाः। आकांक्षाया इच्छात्मकत्वेन चेतनधर्मत्वात्।

परस्परान्वयगोचरेच्छा आकांक्षा।

त्पदद्योतितेषपदश्रो २ तो ४ इसु नोपलाता २

सत्यं। अर्थास्तावत् तर्हि अन्योन्यविषयाकांक्षाजनकत्वेन साकांक्षा उच्यंते। तद्द्वारेण तत्प्रतिपादकानि पदा
न्यपि साकांक्षाणीत्युपचर्यंते। यद्वा पदान्येव स्वार्थप्रतिपाद्यार्थांतरविषयाकांक्षाजनकान्युपचारा
त् साकांक्षाणि। एवमर्थाः साकांक्षाः परस्परान्वययोग्यास्तद्द्वारेण पदान्यपि योग्यानीत्युच्यंते॥ न्य
ने सन्निहितत्वं तु पदानामेकेनैव पुंसा अविलंबेनोच्चारितत्वं। न च साक्षादेव पदे संभवति। नार्थद्वारा॥ पु
ते नायमर्थः संपन्नः। अर्थप्रतिपादनद्वारा श्रोतुः पदांतरविषयामर्थांतरविषयां वा आकांक्षां जनयतां
प्रतीयमानपरस्परान्वययोग्यार्थप्रतिपादकानां पदानां सन्निहितानां समूहो वाक्यमिति। पदं च
वर्णसमूहः। समूहश्चात्र एकज्ञानविषयीभावः। एवं च तत्र वर्णानां क्रमवतां आशुतरविनाशित्वेन
एकदा अनेकवर्णानुभवासंभवात् पूर्वपूर्ववर्णानुभवोत्तरवर्णश्रवणकाले पूर्वपूर्ववर्णानुभव
जनितसंस्कारसहकृतेनांत्यवर्णसंबंधेन पदव्युत्पादनसमये गृहीतेन श्रोत्रेणैव एकदैव सद

अ२ णा

सदनेकवर्णावगाहिनी पदप्रतीतिर्जन्यते। सहकारिसामर्थ्यात्। प्रत्यभिज्ञानवत्। प्रत्यभिज्ञानप्रत्य
क्षे हि प्रतीतिरपि पूर्वावस्थास्फुरत्येव। अतः पूर्वपूर्वपदानुभवजनितसंस्कारसहकृतेनांत्यपद [illegible] सांब
[illegible] श्रोत्रेंद्रियेण पदार्थप्रत्ययानुगृहीतेनानेकपदावगाहिनी वाक्यप्रतीतिर्जायते। तदिदं वाक्यमा
प्तपुरुषप्रयुक्तं सत् शाब्दं नामकं प्रमाणं। फलं तु अस्य वाक्यार्थज्ञानं। तच्चैतच्छाब्दं नामकं प्रमाणं लोके वे
दे च साधारणं। लोके तु अयं विशेषः। यः कश्चिदाप्तो भवति न सर्वः। अतः किंचिदेव लौकिकं वाक्यं प्रमाणं। परा
प्तकर्तृकं। वेदे तु परमाप्तेन श्रीमहेश्वरेण कृते। सर्वमेव वाक्यं प्रमाणं। [illegible]
[illegible] सर्वस्यैवाप्तवाक्यत्वात्। वर्णितानि चत्वारि प्रमाणानि। एभ्योऽन्यत् तु न प्रमाणं।
प्रमाणस्य सतोऽत्रैवांतर्भावात्। नन्वर्थापत्तिरपि पृथक्प्रमाणमस्ति। तथा हि। पीनो देवदत्तो दिवा न भुं
क्ते दृष्टे श्रुते वा रात्रिभोजनं क [illegible] ते। दिवाऽभुंजानस्य [illegible] पीनत्वं रात्रिभोजनमंतरेण नोपपद्यते।

Margin notes: श्रोत्रेंद्रियेण (left); न; एवं; इति; लक्ष्य (below line); नाम; १५ (right); बिनाद्दर्थः (?) १९ (lower right)

अनु नलभ्यते। तस्मात्प्रस्तुताउत्पन्ना। १ अनुपपत्ति रसंभवः

१ अर्थस्य रात्रिभोजनादिरूपस्य आपत्तिः कल्पनमर्थापत्तिः ६

१ अनुपपत्तिज्ञान

तत्

अतः पीनत्वान्यथानुपपत्तिप्र[illegible]तार्थापत्तिरेव रात्रिभोजने प्रमाणं। प्रत्यक्षादिभ्यो भिन्नं रात्रिभोजनस्य
प्रत्यक्षाद्यविषयत्वात्। नैतत्। रात्रिभोजनस्यानुमानविषयत्वात्। तथाहि। अयं देवदत्तो रात्रौ भुंक्ते दिवाऽभु
ञ्जानत्वे सति पीनत्वात्। यस्तु नैवं रात्रौ भुंक्ते नासौ दिवाऽभुंजानत्वे सति पीनः। यथा दिवा रात्रावभुंजानोऽपीनः।
न चायं तथा तस्मान्न तथेति। केवलव्यतिरेक्यनुमानेनैव रात्रिभोजनस्य प्रतीयमानत्वात्। किमर्थमर्थाप
त्तिः कल्पनीया। ननु अभावाख्यमपि प्रमाणमस्ति। तच्चाभावग्रहणायांगीकरणीयं। तथाहि। घटाद्यनु
पलब्ध्या घटाद्यभावो निश्चीयते। अनुपलब्धिश्चोपलब्धेरभावरूपस्य भावप्रमाणेन घटाद्यभावो गृह्यते।
नैतत्। यद्यत्र घटोऽभविष्यत्तदा भूतलमिवाद्रक्ष्यत। इत्यादितर्कसहकारिणाऽनुपलंभसनाथेन प्रत्य
क्षेणैवाभावग्रहणात्। [illegible] ननु इंद्रियाणि संबद्धार्थग्राहकाणि। तथाहि। इंद्रियाणि

पृथक्

४ प्रतियोगिज्ञानाभावाख्यामिसर्थः

सहकारी २

तर्क० १६

१ प्रकाशावच्छ अपुनःसिद्धत्वाभावात् २ बहिरिंद्रियत्वादितिपाठः

१३

अर्थ

[illegible] प्राप्य प्रकाशकानि ॥ [illegible] ज्ञानकारणत्वात्। आलोकवत्। यद्वा चक्षुःश्रोत्रे [illegible] प्राप्यकारिणी इंद्रि-
यत्वात्। त्वगादिवत्। त्वगादीनां तु [illegible] प्राप्य [illegible] कारित्वमुभयवादि[illegible] सिद्धमेव। न च इंद्रियाभावयोः संबं-
धोस्ति। संयोगसमवायौ हि संबंधौ न च तौ तयोस्तः। विशेषणविशेष्यभावसंबंध एव न भवति। भिन्नोभयाश्रि-
तैकत्वाभावात्। संबंधो हि संबंधिभ्यां भिन्नो भवति। उभयसंबंध्याश्रितश्चैकश्च। यथा भेरीदंडसंयोगः॥
स हि भेरीदंडाभ्यां भिन्नस्तावाश्रितश्चैकश्च। नैवं विशेषणविशेष्यभावस्तथा॥ तथा हि दंडपुरुषयोर्विशेषणवि-
शेष्यभावो न ताभ्यां भिद्यते। न हि दंडस्य विशेषणत्वमर्थांतरमपि तु स्वरूपमेव। अभावस्यापि विशेषणत्वात्॥
नह्यभावेस्यं द्रव्याद्यन्यतमस्य संभवः। तस्मादभावस्य स्वोपरक्तबुद्धिजनकं यत्स्वरूपं तदेव विशेषणं। न तु
तदर्थांतरं। एवं व्यापकत्वकारणे [illegible] कारणत्वाच्च। [illegible] भावे सामान्यादिसंभवः। तदेवं वि-
शेषणविशेष्यभावो न विशेषणविशेष्यस्वरूपाभ्यां भिन्नः। नाप्युभयाश्रितः। विशेष[illegible]विशेषणभावमात्रं

च क घोः रू पि त्वं नहि २

२ विशेषणादाश्रय दयोपृथ्वाः स्वोपरक्तबुद्धिजनकं [illegible] स्वरूपमेव हि व्यापकत्वमन्यादीनां। कारणत्वमपि कार्यानुकूलान्वयव्यतिरे-
किस्वरूपमेव तत्त्वादीनां। न तु अर्थांतरं। अभावस्यापि व्यापकत्वात्

१६

स्यसत्वात्।विशेष्यभावस्याभावात्।विशेष्ये च विशेष्यभावमात्रस्य सत्वात्।विशेषणस्याभावात्।नाप्ये
कोविशेषणविशेष्यभावः।विशेषणं च विशेष्यं च विशेषणविशेष्ये तयो भाव इति द्वंद्वांते श्रूयमाणो
मपि भावशब्दः प्रत्येकं संबध्यते। तथा च विशेषणभावो विशेष्यभावश्चेत्यापन्नं।द्वौ चैतौ एकैकसंबंधः। श्र
तस्माद्विशेषणविशेष्यभावो न संबंधः।एवं व्याप्यव्यापकभावादयोपि।।संबंधशब्दप्रयोगस्तु उप
धनिरू[illegible]पि[illegible]लसाधर्म्येणोपचारात्।तथा च असंबद्धस्याभावस्येंद्रियेण ग्रहणं न संभवति।सत्व
भावावच्छिन्नव्याप्तेः भावं प्रकाशयदिंद्रियं प्राप्तमेव प्रकाशयति।न त्वभावं [illegible]।अभावप्रकाश सं॰३४
उ.ली यदिंद्रियं विशेषविशेष्यमुखेनैवेति सिद्धांतः असंबद्धाभावग्रहे अतिप्रसंगस्तु विशेषणतयैव ष्यशेष्य
निरस्तः।समभ्यप[illegible]ते।अत्रोभयोः समो दोषः परिहारोपि वा समः।नैकः पर्यनुयोक्तव्यस्तादृगर्थ
विचारणे ॥५॥ इदानीं [illegible] निरूप्यते॥ श्रीलक्ष्मीनृसिंहकुलदेवतागणेशाभ्यां नमो नमः॥

७३

ज्ञान ४ स्वत ४

३ अतो वप्रामाण्यमवधार्य पुरुषः प्रवर्तते । स्वतस्त्वप्रामाण्यावधारणात् । अनस्या... :३

तर्क० ७

जलादिज्ञाने जाते तस्य प्रामाण्यं अवधार्य कश्चित् जलार्थी प्रवर्तते । कश्चित् संदेहादेव प्रवृत्तः
प्रवृत्तस्तु उत्तरकालं जलप्राप्तिलाभे सति प्रामाण्यं अवधारयतीति वस्तुगतिः । अत्र केचि
दाहुः येनैव ज्ञानं गृह्यते तेनैव प्रामाण्यमपि । न तु ज्ञानग्राहकाद् [illegible] त । ज्ञानधर्मस्य प्रामाण्य
स्य ग्राहकं । तैर्ग्राहकातिरिक्तानपेक्षत्वमेव स्वतस्त्वं प्रामाण्यस्य । ज्ञानं च प्रवृत्तेः पूर्वमेव गृ
हीतं कथमन्यथा प्रामाण्याप्रामाण्यसंदेहोऽपि स्यात् । अनधिगते धर्मिणि संदेहाऽनु
दयात् । तस्मात् प्रवृत्तेः पूर्वमेव ज्ञाततान्यथानुपपत्तिप्रसूतार्थापत्त्या ज्ञानं गृह्यते ज्ञा
नगतं प्रामाण्यमपि अर्थापत्त्यैव गृह्यते ॥ ततः पुरुषः प्रवर्तते । ननु प्रथमं ज्ञानमात्रं
गृह्यते । ततः प्रवृत्तस्तु उत्तरकालं जलदर्शनेन ज्ञानस्य प्रामाण्यमवधार्यते । अत्रोच्यते । ज्ञा
तताऽन्यथानुपपत्तिप्रसूतार्थापत्त्या ज्ञानं गृह्यत इत्युक्तं । तदेव वयं न मृष्यामहे । तथा

२४ द्विती इति नाम ७

न२

प्रामाण्यग्रहस्तु दूरत एवास्ति। तथा हि। इदं किल परस्याभिमतं। घटादिविषये ज्ञाने
जाते मया ज्ञातो यं घट इति घटस्य ज्ञातत्वं प्रतिसंधीयते। तेन ज्ञाने जाते सति ज्ञातता ताऱ
म कश्चिद्धर्मो जायत इत्यनुमीयते। स च ज्ञानात्पूर्वमज्ञातत्वात्। ज्ञाने जाते च जायमान
त्वादित्यन्वयव्यतिरेकाभ्यां ज्ञानेन जन्यत इति अवधार्यते। एवं च ज्ञानजन्यो सौ ज्ञातता
नामकश्चिद्धर्मो ज्ञानमंतरेण नोपपद्यते। कारणाभावे कार्यानुदयात्। तेनार्थापत्त्या स्वका
रणं ज्ञानं ज्ञाततया क्षिप्यत इति। न चैतद्युक्तं। ज्ञानविषयत्वातिरिक्ताया ज्ञातताया अ
भावात्। न नु ज्ञानजनितज्ञातताधारत्वमेव घटादेर्ज्ञानविषयत्वं। तथा हि। न ताव
त्तादात्म्येन विषयता। घटज्ञानयोस्तादात्म्यानभ्युपगमात्। तदुत्पत्त्या तु विषयत्व इंद्रियादे
र्विषयत्वापत्तिः। इंद्रियादेरपि तत्स्य ज्ञानस्योत्पादकत्वात्। तेनेदमनुमीयते। ज्ञानेन घटे किंचिज्जनितं

१ तदुत्पत्त्या विषयत्वाभावेन १ २ तस्माद्विषयादुत्पादितस्तद्धेतुत्पादितः २.

मैवं। २

त॰दी॰
१८

१५

येन घट एव तस्य ज्ञानस्य विषयो नान्य इति। अतो विषयत्वान्यथानुपपत्त्यैव ज्ञाततासिद्धिर्न
प्रत्यक्षमात्रेण। स्वभावादेव [illegible] विषयतोपपत्तेः। अर्थज्ञानयोरेतादृश एव स्वाभाविको विशे
षो येनानयोर्विषयविषयिभावः। [illegible] नन्वस्यातीतानागतयोर्विषयत्वं न स्यात्। ज्ञानेन तत्र
ज्ञातताजननासंभवात्। असति [illegible] धर्मिणि धर्मजननायोगात्। किंच। ज्ञाततायाः अपि ज्ञान
विषयत्वात्। तत्रापि [illegible] प्रसंगः। तथा च अनवस्था। अथ ज्ञाततांतरमंतरेणापि
स्वभावादेव ज्ञानविषयत्वं ज्ञाततायाः। एवं चेत्। तर्हि घटादेरपि किं ज्ञाततयेति। अस्तु वा
ज्ञातता। तथापि तन्मात्रेण ज्ञानमवगम्यते। ज्ञातताविशेषेण प्रामाण्य[illegible]ज्ञानाव्यभिचारि
णा प्रामाण्यमिति। कुत एव ज्ञानग्राहकग्राह्यता प्रामाण्यस्य। अथ केन ज्ञातताविशेषेण
प्रमाणज्ञानाव्यभिचारिणा ज्ञानप्रामाण्यं सहैव गृह्यते। [illegible]

एवं चेत् तदप्रामाण्येऽपि शक्यमिदं वक्तुं

वित२

राम
१८

१ केनचिज्ज्ञातताविशेषेणाप्रमाणज्ञानाव्यभिचारिणा १ ~~[illegible]~~ ...मीमांसकाहि
ज्ञानाप्रामाण्यं सहैव गृह्यते ॥

इति वमपि

४ [illegible] अप्रामाण्यमपि स्वत एव गृह्यते। अथवा अप्रामाण्यं परतः [illegible] प्रामाण्यमपि परत एव गृह्यतां ॥
ज्ञानग्राहकादन्यतदुत्पर्थः। ज्ञानं हि मानसप्रत्यक्षेण गृह्यते। प्रामाण्यं पुनरनुमानेन। तथाहि। जलज्ञाना
नंतरं जला[illegible]र्थिनः प्रवृत्तिर्द्वेधा। फलवती [illegible] अफला चेति। तत्र या फलवती प्रवृत्तिः सा समर्था। तया ज्ञानस्य
याथार्थ्यमनुमीयते। प्रयोगश्च। विवादाध्यासितं जलज्ञानं प्रमाणं। समर्थप्रवृत्तिजनकत्वात्। यत्तु न प्र
माणं न तत्समर्थप्रवृत्तिं जनयति। यथा प्रमाणाभास इति केवलव्यतिरेकी। अत्र फलवत्प्रवृत्तिजनकं
यज्जलज्ञानं तत्पक्षः। तस्य प्रामाण्यं साध्यं। याथार्थ्यमित्यर्थः। ननु प्रमाकरणत्वं [illegible] साध्यं व्यभिचाराप
त्तेः। हेतुस्तु समर्थप्रवृत्तिजनकत्वं। फलवत्प्रवृत्तिजनकत्वमिति पावृत्त। अनेन नु केवलव्यतिरेकेण [illegible] अनुमा
२४ नेनाभ्यासदशापन्नस्य ज्ञानप्रामाण्ये बोधिते तद्दृष्टान्तेन प्रवृत्तेः पूर्वमपि तज्जातीयत्वेन लिंगेनान्वयव्यतिरेकिणानु
मानेनानभ्यस्तज्ञानस्याप्यभ्यास[illegible]दशापन्नस्यापि प्रामाण्यमनुमीयते। इति परत एव प्रामाण्यं न ज्ञानग्राहकेणैव गृ

नं नस्य

पत्रं
१८

ष्यते इति। बलार्थे व प्रमाणानि युक्तिलेशोक्तिपूर्वकं। केशवो बालबोधाय यथाशास्त्रमवर्णयत्। इति प्रमाणा
न्युक्तानि। अथ प्रमेयाण्युच्यंते। आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाः प्रमे — स्तु
यमिति। न्यायसूत्रं। तत्र आत्मत्वसामान्यवानात्मा। स च देहेंद्रियादिव्यतिरिक्तः प्रतिशरीरं भिन्नो विभुर्नित्यश्च।
तु — स च मानसप्रत्यक्षः। विप्रतिपत्तौ बुध्यादिगुणलिंगकः। तथाहि। बुध्यादयस्तावद्गुणाः अनित्यत्वे सत्येकेंद्रिय
स्तमवत्। — ग्राह्यत्वात्। गुणाश्च गुणिनिष्ठा एव। तत्र बुध्यादयो गुणाः न भूतानां। मानसप्रत्यक्षत्वात्। ये हि भूतानां गुणाः
न ते मनसा गृह्यंते। यथा रूपादयः। नापि दिक्कालमनसां गुणाः विशेषगुणत्वात्। ये हि दिक्कालादिगुणाः न ते विशे — संख्यादयः
षगुणाः [illegible] ते हि सर्वद्रव्यसाधारणगुणा एव। बुध्यादयस्तु विशेषगुणाः गुणत्वे सत्येकेंद्रि
यग्राह्यत्वात्। रूपवत्। अतो न दिक्कालादिगुणाः। तस्मादेभ्योऽष्टभ्योऽतिरिक्तो बुध्यादीनां गुणी द्रव्यः। स एवात्मा।
प्रयोगश्च बुध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः। पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात्।

यत्तु पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितो न भवति। नासौ पृथिव्याद्यष्टद्रव्यानाश्रितो गुणः। यथा रूपा
दिरिति केवलव्यतिरेकी। अन्वयव्यतिरेकी वा। तथाहि। बुद्ध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रि
ताः पृथिव्याद्यनाश्रितत्वे सति गुणत्वात्। यो यदनाश्रितो गुणः स तदतिरिक्ताश्रितो भवति। यथा पृथिव्या
द्यनाश्रितः शब्दः पृथिव्याद्यतिरिक्ताकाशाश्रितो भवति। तदेवं पृथिव्याद्यष्टद्रव्यातिरिक्तं नवमं द्रव्यमा
त्मा सिद्धः। स च सर्वत्र कार्योपलंभाद्विभुः। परममहत्परिमाणवानित्यर्थः। विभुत्वान्नित्यो सौ व्योमवत्।
सुखादिवैचित्र्यात् प्रतिशरीरं भिन्नः। तस्य भोगायतनं [illegible] शरीरं। सुखदुःखान्यतरानुभवो भोगः। स
च यत्र वच्छिन्ने आत्मनि जायते तद्भोगायतनं तदेव शरीरं। चेष्टाश्रयो वा शरीरं। चेष्टा तु हिताहितप्रा
प्तिपरिहारार्थक्रिया न तु स्पंदनमात्रं। शरीरसंयुक्तं ज्ञानकरणमतींद्रियमिंद्रियं। अतीं[illegible]द्रियमुक्ते
[illegible] कालादिष्वतिव्याप्तिप्रसंगः। अत उक्तं ज्ञानकरणमिति। तथापींद्रियार्थसंनिकर्षेतिप्रसंगः। [illegible]

दी नाम।

इद्रव्या
५

द्रव्या
न्मातरा

करकावत् ६ शरीरसंयुक्तं ज्ञानकरणमिंद्रियमित्युक्ते। आलोकेपींद्रियत्वप्रसंगः अत उक्तं मनसोंद्रियामिति ॥

स ४

अत उक्तं शरीरसंयुक्तमिति। तानि चेंद्रियाणि षट्। घ्राणरसनचक्षुःश्रोत्रत्वङ्मनांसि। तत्र गंधोपलब्धिसाधनमिंद्रियं घ्राणं। नासाग्रवर्त्ति। तच्च पार्थिवं गंधवत्वात्। गंधवत्वं च। गंधग्राहकत्वात्। यदिंद्रियं रूपादिपंचकमध्ये यं गुणं गृह्णाति तदिंद्रियं तद्गुणयुक्तं। यथा चक्षू रूपग्राहकं रूपवत्। गंधग्राहकं घ्राणमतो गंधवत्। रसोपलब्धिसाधनमिंद्रियं रसनं। जिह्वाग्रवर्त्ति। तच्चाप्यं रूपादिषु पंचसु मध्ये रसस्यैवाभिव्यंजकत्वात्। लालावत्। रूपोपलब्धिसाधनं चक्षुः। कृष्णताराग्रवर्त्ति। तच्च तैजसं। रूपादिषु पंचसु मध्ये रूपस्यैवाभिव्यंजकत्वात् प्रदीपवत्। स्पर्शोपलब्धिसाधनमिंद्रियं त्वक्। सर्वशरीरव्यापि। तच्च वायवीयं। रूपादिषु पंचसु मध्ये स्पर्शस्यैवाभिव्यंजकत्वात्। अंगसंगिसलिलशैत्याभिव्यंजकव्यजनपवनवत्। शब्दोपलब्धिसाधनमिंद्रियं श्रोत्रं। तच्च कर्णशष्कुल्यवछिन्नमाकाशमेवानद्रव्यां

मिंद्रियं

त० दी०
२०

स्थानं ३ दिंद्रियं

तरं। शब्दगुणत्वात्। तस्य शब्दग्राहकत्वात्। यदिंद्रियं रूपादिषु पंचसु मध्ये यद्गुणं गृह्णाति तत्तद्गुण
संयुक्तं। यथा चक्षुरादि। शब्दग्राहकं च श्रोत्रं। अतः शब्दगुणकं। सुखाद्युपलब्धिसाधनमिंद्रियं मनः। तत्
चाणुपरिमाणं। ननु चक्षुरादींद्रियसद्भावे किं प्रमाणं। उच्यते। अनुमानमेव। रूपाद्युपलब्धयः करणसा
ध्याः क्रियात्वात्। छिदिक्रियावत्। अर्थाः षट्पदार्थाः द्रव्यगुणकर्मसामान्यसमवायाः। प्रमाणद्वयोर्यद्य

तथापि

प्यत्रैवांतर्भवंति प्रयोजनवशाद्भेदेन [illegible] कीर्तनं। तत्र समवायिकारणं द्रव्यं। गुणाश्रयो वा [illegible]। तानि च द्रव्या

विशेष

णि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव। तत्र पृथिवीत्वसामान्यवती पृथिवी। काठि
न्यकोमलत्वाद्यवयवसंयोगविशेषयुक्ता घ्राणशरीरमृत्पिंडपाषाणादिरूपा। रूपरसगंधस्पर्शसंख्या
परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती। सा च द्विधा। नित्याऽनित्या च।
परमाणुरूपा नित्या। कार्यरूपाऽनित्या। द्विविधायामपि पृथिव्यां रूपरसगंधस्पर्शा अनित्याः पाकजाश्च।

पाकस्तु तेजःसंयोगः। तेन पृथिव्याः पूर्वरूपादयो नश्यंति। अन्ये जन्यंत इति पाकजाः। अप्त्वसामान्य वत्याऽ
पः। शीतस्पर्शवत्य आपः। रसनेंद्रियशरीरसरित्समुद्रहिमकरकादिरूपाः। गंधवर्जितस्नेहयुक्तपूर्वोक्तगुण
वत्यः। नित्याऽनित्याश्च। नित्यानां तु रूपादयो नित्या एव। तेजस्त्वसामान्यवत्तेजः। चक्षुःशरीरवह्निसवित
सुवर्णविद्युदादि[illegible]। रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाऽपरत्वद्रवत्वसंस्कारवत्। नि
त्यमनित्यं च पूर्ववत्। तच्चतुर्विधं। उद्भूतरूपस्पर्शं। अनुद्भूतरूपमनुद्भूतस्पर्शं। उद्भूतरूपमनुद्भूतस्पर्शं चे
ति। उद्भूतरूपस्पर्शं [illegible] यथा। पिंडीभूतं तेजो वह्न्यादिकं। सुवर्णं तु उद्भूताभिभूतरूपस्पर्शं। अनुद्भूतरूप
त्वे अचाक्षुषं स्यात्। अनुद्भूतस्पर्शत्वे त्वचा न गृह्येत। अभिभवस्तु बलवत्सजातीये न पार्थिवैरूपस्पर्शैर्नि
वकृतः। अनुद्भूतरूपस्पर्शं तेजो यथा। चक्षुरिंद्रियं। अनुद्भूतरूपमुद्भूतस्पर्शं तेजो यथा। तप्तवारिस्थं तेजः। उ
द्भूतरूपमनुद्भूतस्पर्शं तेजो यथा। प्रदीपप्रभामंडलं। वायुत्वाभिसंबंधवान् वायुः। त्वगिंद्रियप्राणवातादिप्रभेदः।

प्रमेदं। तत्र पा न शरीर नाम २२

टिकौ ३ मंतरेणानुपपद्यमानोऽनुमिन.

स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाऽपरत्ववेगवान्॥ स च स्पर्शानुमेयः। तथाहि।
(सति) योयं वायौ वाति अनुष्णाशीतस्पर्श उपलभ्यते। स च गुणत्वाद्गुणिनमनुमापयति। गुणी च वायुरेव॥
पृथिव्या अनुपलब्धेः पृथिवी वायुव्यतिरेकेणानुष्णाशीतस्पर्शाभावात्। पृथिव्यास्तु पाकजः स च (एव)
द्विविधो नित्याऽनित्यभेदात्। नित्यः परमाणुरूपो वायुः। अनित्यः कार्यरूपः। तत्र पृथिव्यादीनां चतु
र्णां कार्याणां उत्पत्तिविनाशक्रमः कथ्यते। द्वयोः परमाण्वोः क्रियया संयोगे सति द्व्यणुकमुत्पद्यते॥
तस्य परमाणू समवायिकारणं। तत्संयोगोऽसमवायिकारणं। अदृष्टादिर्निमित्तकारणं। ततो द्व्यणु
कानां त्रयाणां क्रियया संयोगे सति त्र्यणुकमुत्पद्यते। तस्य द्व्यणुकानि समवायिकारणानि। शेषं पूर्ववत्॥
(चतुर्भिः) एवं त्र्यणुकैश्चतुरणुकं। चतुरणुकैः परं। स्थूलं स्थूलतरं स्थूलतमं। एवं क्रमेण महापृथिवी [illegible]। महत्य
आपः। महत्तेजः। महांश्च वायुरुत्पद्यते। कार्यगतरूपादयः। स्वाश्रयसमवायिकारणगतेभ्यो रूपादिभ्यो।

जायंतेत [blot] ५   २ जयंते॥ तया २

त०भा
२२

जायंते। कारणगुणा हि कार्यगुणानारभंते इति न्यायात्। उत्पन्नस्य च स्य रूपादिमतः कार्यद्रव्यस्य घटादे
रवयवे कपालादौ नोदनादभिघाताद्वा क्रिया [illegible] विभागः। तेनावयवारंभकस्यासमवायिकारणस्य स्य
संयोगस्य नाशः क्रियते। तेन कार्यद्रव्यस्यावयविनो घटादेर्नाशः। एवम् असमवायिकारणनाशेन द्रव्यना
शो दर्शितः। क्वचित् समवायिकारणनाशेनापि द्रव्यनाशः। यथा पूर्वोक्तस्य [illegible] पृथिव्यादेः संहारसंज्ञे हि
सर्गे महेश्वरस्य संजिहीर्षा ततोऽणुषु क्रिया। तयोर्विभागो विभागात् संयोगनाशो द्व्यणुके नष्टेषु आश्रयनाशा
त् त्र्यणुकादिनाश क्रमेण पृथिव्यादिनाशः। यथा [illegible] तंतुनाशेन पटनाशः। तद्गतानां रूपादीनाम् आश्रया च
नाशेनैव नाशः॥ अन्यत्र तु सत्येव आश्रये विरोधिगुण[illegible] प्रादुर्भावेन विनाशः। यथा पाकेन घटादिरूपादि
नाश इति। किं पुनः परमाणुसद्भावे प्रमाणं। उच्यते। यदिदं जालसूर्यमरीचिस्थं सर्वतः सूक्ष्मतमं रज
उपलभ्यते तत् स्वल्पपरिमाणात्। स्वल्पपरिमाणद्रव्यारब्धं कार्यद्रव्यत्वात्। घटवत्। तच्च द्रव्यं कार्यम् [illegible]मे

नाम
२२

न्यून ततः५

त्व। महद्द्रव्यारंभकस्य कार्यत्वनियमात्। तदेवं कार्यं त्र्यणुकाख्यं द्रव्यांतरं सिद्धं। तदपि स्वल्पपरिमाणस
मवायिकारणारब्धं कार्यद्रव्यत्वात् घटवत्। यस्त्र्यणुकारंभकः स एव परमाणुः स वा आरब्ध इति न
नुकार्यद्रव्यारंभकस्य कार्यत्वाव्यभिचारात्। कथमस्यानारब्धत्वं उच्यते। अनंतकार्यपरंपरादोषप्र
संगात्। तथा च सत्यनंतद्रव्यारब्धत्वाविशेषेण मेरुसर्षपयोरपि तुल्यपरिमाणत्वप्रसंगात्।
तस्मादनारब्ध एव परमाणुः। द्व्यणुकं तु द्वाभ्यामेव परमाणुभ्यामारभ्यते। एकस्यानारंभकत्वात्। त्र्या
दिकल्पनायां प्रमाणाभावात्। त्र्यणुकारब्धं च द्रव्यं त्रिभिरेव द्व्यणुकैरारभ्यते। एकस्यानारंभकत्वात्।
द्वाभ्यामारंभे कार्यगतमहत्त्वानुपपत्तिप्रसंगात्। कार्ये हि महत्त्वं कारणमहत्त्वात्। कारणबहुत्वाद्वा। तत्र प्र
थमस्यासंभवात् चरममन्वेषितव्यं। न चतुरादिकल्पनायां प्रमाणमस्ति। त्रिभिरेव महत्त्वारंभोपपत्तेरि
ति॥ शब्दगुणमाकाशं। शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागवत्। एकं विभु नित्यं च शब्दलिंगं च।

३ अनुमानकर्तृत्वमिति तात्पर्यः।३

२ द्विशेषगुण।।२

त १॥

ज्ञानं १

त०बा

२३

सं

नुमेयं॥ शब्दलिंगत्वमस्य कथं। परिशेषात्। प्रसक्तप्रतिषेधे अन्यत्राप्रसंगात् शिष्यमाणे संप्रत्ययः परिशेषः।तथाहि। शब्दस्तावत्सामान्यवत्वे सत्यस्मदादिबाह्येंद्रियग्राह्यत्वा [illegible]। रूपादिवत्। गुण श्च गुण्याश्रित एव। न चास्य पृथिव्यादिचतुष्टयमात्मा च गुणी भवितुमर्हति। श्रोत्रग्राह्यत्वात् शब्दस्य। ये हि पृथिव्यादिगुणाः न ते श्रोत्रेण गृह्यंते। यथा रूपादयः। शब्दस्तु गृह्यते श्रोत्रेण। न च दिक्कालमनसां गुणः विशेषगुणत्वात्। अत एतदतिरिक्तः शब्दस्य गुण्यनुमीयते। स एव आकाशं इति। न तत्र [illegible]। भेदे प्रमाणाभावात्। एकत्वेनै [illegible] वोपपत्तेः। एक [illegible] नो काशत्वं नाम सामान्यमाकाशे विद्यते।

४ णा

व्या

उ

[illegible] सर्वत्र कार्योपलब्धेः। अत एव विभुत्वान्नित्यत्वमिति। कालोऽपि दिग्विपरी [illegible] तपर त्वापरत्वानुमेयः। संख्यापरिमाणपृथक्त्वसंयोगविभागवान्। एकोऽपि नित्यो विभुश्च। कथमस्य दिग्विपरीत परत्वापरत्वानुमेयत्वं। उच्यते। सन्निहिते वृद्धे सन्निधानादपरत्वार्हे विपरीतं परत्वं प्रतीयते॥ — — — — — —

ननु

सामान्यस्यानेकवृत्तित्वात्॥ विभुत्वाकाशं परममहत्परिमाणमित्यर्थः।।४

२३

७ सुखदुःखबोधेच्छाज्ञानानां तत्रैव ७ तस्य गुणाः संख्यादयः पंचबुध्यादयो नव । ७ नित्यत्व
२२ म विभुत्वे पूर्ववत् । ७ द

व्यवहिते यूनि स्थविरापेक्षया परत्वात् इह विपरीतं परत्वं प्रतीयते । तदिदं दिक्कृत विपरीतं परत्वमपरत्वं च कार्यं सत्कारणस्यादिगादेः संभवात् कालमेव कारणं अनुमापयति । स चैकोपि वर्तमानातीतभविष्यत्क्रियोपाधिवशात् वर्तमानादिव्यपदेशं लभते । पुरुष इव पच्यादिक्रियोपाधिवशात् पाचकादिव्यपदेशं । नित्यत्वविभुत्वे चास्य पूर्ववत् । दिक्कृतपरत्वापरत्वानुमेया दिक् । दिक् सैका नित्या विभ्वी च । संख्यापरिमाणपृथक्त्वसंयोगविभागगुणवती । पूर्वापरादिप्रत्ययैरनुमेया । तेषामन्यनिमित्तासंभवात् । पूर्वस्मिन् पश्चिमे वा वस्तुनि तद्व्यवहारात् । सा चैकापि सवितुस्तत्तद्देशसंयोगोपाधिवशात् प्राच्यादिसंज्ञां लभते । आत्मत्वाभिसंबन्धवान् आत्मा । स चोक्त एव । मनस्त्वसामान्यवन्मनः । ~~अणुपरिमाणं संयोगि~~ अंतरिंद्रियं । सुखाद्युपलब्धिकरणं नित्यं । संख्याद्यष्टगुणवत् । तत्संयोगेन बाह्येंद्रियमर्थग्राहकं । अत एव सर्वोपलब्धिसाधकं । तच्चाप्रत्यक्षं । अपि तु अनुमानगम्यं । तथाहि । सुखाद्युपलब्धयः चक्षुराद्यतिरिक्त

कपाठ

छिद्रपत्र

करणसाध्याः॥ असत्स्वपि चक्षुरादिषु जायमानत्वात्। यच्चैतेषां करणं। तन्मनः। तच्चाणुपरिमाणं॥
हृद्यान्युक्तानि। गुणा उच्यंते॥ सामान्यवानसमवायिकारणमस्पन्दात्मा गुणः। स च द्रव्याश्रितः॥
रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबु
द्धिसुखदुःखेछाद्वेषप्रयत्नाधर्माधर्मसंस्कारभेदाच्चतुर्विंशतिधा। तत्र रूपं चक्षुर्मात्रग्राह्यो विशे
षगुणः पृथिव्यादित्रयवृत्ति। तच्छुक्लाद्यनेकप्रकारं। पाकजं च पृथिव्यां। शुक्लभास्वरमपाकजं तेजसि।
मपाकजं
तद्वाभास्वरमप्सु। रसो रसनेन्द्रियग्राह्यो विशेषगुणः पृथिवीजलवृत्तिः। तत्र पृथिव्यां मधुरादिष
ट्प्रकारः पाकजश्च। अप्सु मधुर एव रसोऽपाकजो नित्योऽनित्यश्च। नित्यः परमाणुषु तदन्येषु कार्यरू
पेष्वनित्य इति। गंधो घ्राणग्राह्यो विशेषगुणः पृथिवीमात्रवृत्तिः। स च द्विविधः। सुरभिरसुरभि
श्च। जले तु गंधप्रतिभानं संयुक्तसमवायेन पृथिव्याः। स्पर्शस्त्वगिन्द्रियमात्रग्राह्यो गुणः पृथिव्या
विशेष
तत्रानित्यं पृथिवीमात्रे। आप्यतैजसपरमाण्वोर्नित्यं। आप्यतैजसकार्येष्वनित्यं। रूपाद्य
नेकविधं पृथिव्यां। ५

स्त्वचतुष्टयवृत्तिः। सचत्रिविधः। शीतोष्णानुष्णाशीतभेदात्। शीतः पयसि। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः। एते रूपादयश्चत्वारो महत्वे कार्थसमवेतत्वे सति उद्भूता एव प्रत्यक्षाः। संख्या एकत्वा दिव्यवहारहेतुः सामान्यगुणः। एकत्वादिपरार्द्धपर्यंता। तत्रैकत्वं द्विविधं। नित्यानित्यभेदात्। नित्यगतं तु नित्यं कार्यगतं त्वनित्यं। स्वाश्रयसमवायिकारणैकत्वजन्यं। द्वित्वादि त्वनित्यमेव। तच्च द्वयोः पिंडयोरिदमेकमिदमेकमित्यपेक्षाबुध्या जन्यते। तत्र पिंडौ द्वौ समवायिकारणं। पिंडयोरेकत्वे असमवायिकारणं॥ अपेक्षाबुद्धिर्निमित्तं। अपेक्षाबुद्धिविनाशादेव द्वित्वविनाशः। एवं त्रित्वाद्युत्पत्तिर्ज्ञेया। परिमाणंतु मानव्यवहारासाधारणकारणं। तच्चतुर्विधं। अणुमहद्दीर्घह्रस्वभेदात्। तत्र कार्यगतपरिमाणं [illegible] संख्याकारणकमित्यर्थः। अणुकपरिमाणंतु स्वाश्रय समवायिकारणगतबहुत्वसंख्यायोनि। चतुरणुकादिपरिमाणंतु स्वाश्रयसमवायिकारण[illegible]

(margin: जनिततवा)

२ × संख्यापरिमाणप्रचययोनि। तद्यथा घ्यणुकपरिमाणमीश्वरापेक्षाबुद्धिजन्यं। परमाणुद्वित्वजनितत्वात्संख्यायोनि। × २

४ क्रियावता द्रव्येनेन सह निःक्रियस्य स्थाणोः संयोगः । तस्य हि श्येन क्रियासमवायिकारणं । उभयकर्मजो यथा । ४४

२५ ...परिमाणजन्यं । स्थूलपिंडपरिमाणं तु प्रचयेयोनि । प्रचयस्तु स्वाश्रयसमवायिकारणावयवानां प्रशिथिलसंयोगः । परमाणुपरिमाणं परममहत्परिमाणं वा काशादिगतं नित्यमेव । पृथक्त्वं पृथग्व्यवहारकारणं । संयोगः संयुक्तव्यवहारहेतुः । घाश्रितो व्याप्यवृतिश्च । सत्रिविधः । अन्यतरकर्मजः । उभयकर्मजः संयोगजश्चेति । तत्र अन्यतरकर्मजो यथा । सक्रिययोर्मल्लयोः संयोगः । संयोगजः संयोगो यथा । कारणाकारणसंयोगात्कार्याकार्यसंयोगः यथा हस्ततरुसंयोगेन कायतरुसंयोगः । विभागो विभक्तव्यवहारहेतुः । संयोगपूर्वको घाश्रयः । सोपि त्रिविधः । अन्यतरकर्मजः । उभयकर्मजो विभागश्चेति । तत्र प्रथमो यथा । शैलात् श्येनक्रियया शैलश्येनविभागः । द्वितीयो यथा । मल्लयोर्विभागः । तृतीयो यथा । हस्ततरुविभागात्कायतरुविभागः । परत्वापरत्वे परापरव्यवहारकारणे । ते तु द्विधे । दिक्कृते कालकृते च । दिक्कृतयोरुपपत्तिः कथ्यते । एकस्यां दिश्यवस्थितयोः पिंडयोरिदमस्मात्

नन्व द्विविधं । एकपृथक्त्वं अनेकपृथक्त्वं चेति । तत्राद्यं नित्यं । अनित्यं । आश्रितमनित्यं । अनेकपृथक्त्वं तु अनित्यमेव ।

सन्निकृष्टमिसपेक्षाबुध्यानुगृहीतेन दिक्पिंडसंयोगेनापरत्वं सन्निकृष्टे जन्यते। विप्रकृष्टबुध्यापरत्वं
विप्रकृष्टे जन्यते। सन्निकृष्टस्क द्रष्टुः शरीरापेक्षया संयुक्तसंयोगाल्पीयस्त्वं। तद्भूयस्त्वं विप्रकर्षः।
कालकृतयोः परत्वापरत्वयोरुत्पत्तिः कथ्यते। अनियतदिगवस्थितयोर्युवस्थविरपिंडयोरयमस्मा
दल्पतरकालेन संबद्ध इति अपेक्षाबुध्यानुगृहीतेन कालपिंडसंयोगेन यून्यपरत्वं। अयमस्माद्ब
हुतरकालसंबंध इति धियास्थविरे परत्वं। गुरुत्वमाद्यपतनासमवायिकारणत्वं। पृथ्वीजलवृत्ति।
यथोक्तं। संयोगवेगप्रयत्नाभावे सति गुरुत्वात्पतनमिति। द्रवत्वमाद्यपतनासमवायिकारणत्वं। भू
तेजोजलवृत्ति। भूतेजसोर्घृतादिस्कवर्णयोरग्निसंयोगेन द्रव्यत्वान्नैमित्तिकं द्रवत्वं। जलेतु नैसर्गि
कं। स्नेहश्चिक्कणता। जलमात्रवृत्तिः कारणगुणपूर्वकः। गुरुत्वादिवद्यावद्द्रव्यभावी। शब्दः श्रोत्र
ग्राह्यः। आकाशस्य विशेषगुणः। ननु कथमस्य श्रोत्रेण ग्रहणं। यतो भेर्यादिदेशे शब्दो जायते॥

त० २६

श्रोत्रंच पुरुषदेशेस्ति। स स्वं भेर्यादिदेशे जातः शब्दः। वीचीतरंगन्यायेन कदंबगोलकन्यायेन वा सं
निहितशब्दांतरमारभते। स च शब्दः शब्दांतरमारभते। इति क्रमेण श्रोत्रदेशे जातोंत्यः शब्दः। श
ब्दांतरारंभक्रमेण श्रोत्रदेशेंत्यं शब्दं जनयति। सोंत्यः शब्दः श्रोत्रेण गृह्यते। नैयायिकमध्यमः। भे
रीशब्दो मया श्रुत इति धीरत्रभ्रांतैव। भेरीशब्दोत्पत्तौ भेर्याकाशसंयोगो असमवायिकारणं।

४ पूर्व

भेरीदंडसंयोगो निमित्तं। वंशपाटनोत्पचटचटाशब्दोत्पत्तौ वंशदलाकाशविभागोऽसमवायिकार
णं। दलद्वयविभागो निमित्तं। इत्थमाद्यः शब्दः संयोगजो [illegible]ः। तथा चोक्तं। संयोगाद्विभागात्
शब्दाच्च शब्दनिष्पत्तिरिति। आद्यादीनां सर्वशब्दानामाकाशमेव [illegible] समवायिकारणं। कर्मबुद्धि
वत्त्रिक्षणमात्रस्थायिनः। तत्राद्यमध्यमशब्दाः कार्यशब्दनाश्याः। अंत्यं स्तुउपांत्येन उपांत्यस्त्व

विभागजो वा। अ समध्यमशब्दा। [illegible] असमवायिकारणकाः। अनुकूलवातनिमित्तकाः।

स्तु

गौत
२६

स्येनसुंदोपसुंदन्यायेन विनाश्येते। इदं त्वयुक्तं। उपांत्यक्षणावस्थायिनां सत्त्याद्वितीयक्षणात्तु
गामिनात्तृतीयक्षणे सा सत्तां स्वनाशजननासंभवात्। तस्मादुपांत्यनाशादेव नाश इति। विनाशित्वं
तु शब्दस्यानुमानात्। अनित्यः शब्दः सामान्यवत्त्वे सति अस्मदादिबाह्येंद्रियग्राह्यत्वात्। घटवत्।
तत्र शब्दस्यानित्यत्वं साध्यं। अनित्यत्वं च विनाशावच्छिन्नस्वरूपत्वमेव। न तु विनाशावच्छिन्नसत्तायो
गः। प्रागभावे सत्ताहीने ऽनित्यत्वासंभवात्। सामान्यवत्त्वे सति अस्मदादिबाह्येंद्रियप्रत्यक्षत्वं हेतुः।
[illegible]दि त्वनुमाने आत्मना व्यभिचारः स्यादित्यत उक्तं बाह्येंद्रियेति। एवमपि योगिबाह्येंद्रिय
प्रत्यक्षेण व्यभिचारः स्यादित्यतो योगींद्रियनिरासार्थं अस्मदादीति। किं पुनर्योगिसद्भावे प्रमाणं।
उच्यते। परमाणवः कस्यचित्प्रत्यक्षाः। प्रमेयत्वात्। घटवत्। यथा सामान्यादिना व्यभिचारः स्यादित्यत
इंद्रियप्रत्यक्षत्वा

उक्तं सामान्यवत्वे सतीति। सामान्यादित्रयं तु निःसामान्यं। अर्थप्रकाशिका बुद्धिः। प्रीतिः सुखं। तच्च
सर्वात्मनाऽनुकूलवेदनीयं। पीडा दुःखं। तच्च सर्वात्मना प्रतिकूलवेदनीयं। रागइच्छा। क्रोधो द्वेषः। उत्सा
हः प्रयत्नः। बुध्यादयः षण्मानसप्रत्यक्षाः। सुखदुःखयोरसाधारणकारणे धर्माऽधर्मौ। तौ चाप्रत्य
क्षावप्यागमगम्यावनुमीयेते। तथाहि। देवदत्तस्य शरीरादिकं देवदत्तविशेषगुणजन्यं। कार्यत्वे स
ति देवदत्तस्य भोगहेतुत्वात्। देवदत्तप्रयत्नजन्यवस्तुवदिति। यश्च शरीरादिजनक आत्मगुणः
स एव धर्मोऽधर्मश्च। प्रयत्नादीनां शरीराद्यजनकत्वादिति। संस्कारस्त्रिविधः। वेगो भावना स्थि
तिस्थापकश्च। तत्र वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः। सर्वक्रियावृत्तिः। भावनाख्यस्तु संस्कार आ
त्ममात्रवृत्तिरनुभवजन्यः स्मृतिहेतुः। स चोद्बुद्ध एव स्मृतिं जनयति। उद्बोधश्च सहकारिलाभः।

सहकारिणश्च संस्कारस्य सदृशादर्शनादयः। यथोक्तं। सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधका
इति। स्थितस्थापकस्तु स्पर्शवद्विशेषवृत्तिः। अन्यथाकृतस्य स्वाश्रयस्य धनुरादेः पुनस्तादवस्थ्या
पादकः। एते बुध्यादयोऽधर्मान्ता भावनावान्ता विशेषगुणाः। एवं गुणा उक्ताः। इदानीं कर्मोच्यते। चल
नात्मकं कर्म। गुणइव द्रव्यमात्रवृत्ति। अविभुद्रव्यपरिमाणेन मूर्त्तत्वापरनाम्ना सहैकार्थसमवेतं ॥
विभागद्वारा पूर्वदेशसंयोगनाशे सति उत्तरदेशसंयोगहेतुश्च। तच्च उत्क्षेपणापक्षेपणाऽकुं
चनप्रसारणगमनभेदात्पंचविधं। भ्रमणादयस्तु गमनग्रहणेनैव गृह्यन्ते। अनुवृत्तिप्रत्ययहेतुः
सामान्यं। द्रव्यादित्रयवृत्ति। नित्यमेकमनेकानुगतं। [illegible] तच्च द्विविधं। परमपरं च। परं सत्ता। बहुविष
यत्वात्। सा चानुवृत्तिमात्रहेतुत्वात् सामान्यमात्रं। अपरं द्रव्यत्वादि। अल्पविषयत्वात्। तच्च व्या
वृत्तेरपि हेतुत्वात्सामान्य विशेषः। अत्र कश्चिदाह। व्यक्तिव्यतिरिक्तं सामान्यं नास्तीति। अत्र

एकाकारप्रतीतिः एको विषयो अन्यो र्थं नियमः

त०भाषाप्र
२८

ब्रूमः। किमालंबनात र्हि भिन्नेषु विलक्षणेषु अनेकेषु पिंडेषु एकाकारबुद्धिर्विना सर्वानुगतमेकं तदे
व सामान्यमिति। ननु तस्यात द्व्यावृत्तिकृतैवैकाकारबुद्धिरस्तु। तथाहि। सर्वेष्वेव गोपिंडेष्वगोभ्योऽ
श्वादिभ्यो व्यावृत्तिरस्ति। तेनागो व्यावृत्तिविषय एवायमेकाकारप्रत्ययोऽनेकेषु गोपिंडेषु। न तु विधि
रूपगोत्वसामान्यविषयः। मैवं। विधिमुखेनैवैकाकारग्रहणात्। विशेषो नित्यद्रव्यवृत्तिः। व्यावृत्तिबु
द्धिमात्रहेतुः। नित्यद्रव्याणि आकाशादीनि पंच। पृथिव्यादयश्चत्वारः परमाणुरूपाः। अयुतसिद्धयोः
संबंधः समवायः स चैक एव। ननु अवयवावयविनावप्ययुतसिद्धौ तेन तयोः संबंधः समवाय इति। न
चैतद्युक्तं। अवयवातिरिक्तस्यावयविनोऽसंभवात्। परमाणवो हि तथा तथा सन्निकृष्टा बहवो घटो
ऽयं पटोऽयमिति गृह्यंते। अत्रोच्यते। अस्ति तावदेकः स्थूलोऽयं घट इति प्रत्यक्षा बुद्धिः। न च परमाणुष्वनेके
ष्वस्थूलेष्वतीन्द्रियेषु भवितुमर्हति। भ्रांतेयं बुद्धिरिति चेन्न। बाधकाभावात्। तदेवं षट्पदार्था द्रव्या

राम
२८

द्रयोर्वर्णिताः तेन विधिमुखप्रत्ययवेद्यत्वात् भावरूपा एव। इदानीं निषेधमुखप्रमाणगम्योऽभावरूपः
सप्तमः पदार्थः प्रतिपाद्यते। अभावः संक्षेपतो द्विविधः। संसर्गाभावोऽन्योन्याभावश्चेति। संसर्गाभा
वोपि त्रिविधः। प्रागभावः प्रध्वंसाभावोऽत्यंताभावश्चेति। उत्पत्तेः प्राक्कारणे कार्यस्य अभावः प्रागभावः।
यथा तंतुषु पटाभावः। स चानादिः। उत्पत्तेरभावात्। अनादिरपि विनाशी च। कार्यस्यैव तद्विनाशरूपत्वात्।
उत्पन्नस्य कार्यस्य कारणेऽभावः प्रध्वंसाभावो विनाश इति यावत्। यथा भग्ने घटे कपालमालायां घटा
भावः। स च मुद्गरप्रहारजः। स चोत्पत्तिमानपि अनाशी। नष्टस्य पुनरनिवृत्तेः। त्रैकालिकोऽभावोऽत्यंताभावः।
यथा वायौ रूपाभावः। अन्योन्याभावस्तु तादात्म्यप्रतियोगिकोऽभावः। घटः पटो न भवतीति। तदेवमर्था
व्याख्याताः। ननु ज्ञानाद्रूपेणो वा व्यतिरिक्ता अर्था न संति। नैवं। अर्थानामप्रत्यक्षसिद्धत्वेनाशक्यापला
पत्वात्। बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यादिभिः पर्यायशब्दैर्यदभिधीयते। सा बुद्धिरर्थप्रकाशो वा बुद्धिः।

सा च संक्षेपतो द्विविधा। अनुभवस्मरणं च। अनुभवोपि द्विविधः। याथार्थोऽयथार्थश्च। तत्र यथार्थो
मिथ्याज्ञानत्वरहितः स च प्रत्यक्षादिप्रमाणैर्जन्यते। यथा चक्षुरादिभिरदुष्टैर्घटादिज्ञानं। धूमलिंग
कमग्निज्ञानं। गोसादृश्यदर्शनाद्गवयशब्दवाच्यताज्ञानं। ज्योतिष्टोमेन स्वर्गकामो यजेतेति वाक्यात्।
ज्योतिष्टोमस्य स्वर्गसाधनज्ञानं। अयथार्थस्तु अर्थव्यभिचारी अप्रमाणजः। स त्रिविधः। संशयस्तर्को
विपर्यय इति। संशयतर्कौ वक्ष्येते। विपर्ययस्तु अतस्मिंस्तद्ग्रहणमिति। भ्रम इति यावत्। यथा पुरो
वर्तिन्येवारजते शुक्त्यादौ रजतरूपग्रहः। इदं रजतमिति। स्मरणमपि यथार्थमयथार्थं चेति द्वि
धं। तदुभयं जागरे। स्वप्ने तु सर्वं ज्ञानं स्मरणमेव। अयथार्थं च दोषवशेन तदिति स्थाने इदमिति उदया
त्। सर्वं च ज्ञानं निराकारमेव। न तु ज्ञाने अर्थेन स्व[illegible]स्याकारो जन्यते। साकारज्ञानवादिनिराका
रणात्। अत एव अर्थाकारेणार्थानुमानमपि निरस्तं। प्रत्यक्षसिद्धत्वात् घटादेः। सर्वं ज्ञानं अर्थनिरूप्यं।

अर्थप्रतिबद्धस्यैव तस्य मनसो निरूपणात् ॥ [illegible] ॥ युग
ज्ञानवानहं नतु ज्ञानवानहमस्मीत्येतावन्मात्रं जायते ॥ अं तरिंद्रियं मनस्तच्चोक्तमेव ॥ प्रवृत्तिर्ध
र्माधर्ममयी यागादिक्रिया ॥ सा च तेर्जगद्व्यवहारस्य साधकत्वात् । दोषो रागद्वेषमोहाः । रागद्वे
षौ द्वेषो मन्युः । क्रोध इति यावत् । मोहो मिथ्याज्ञानं विपर्यय इति यावत् ॥ पुनरुत्पत्तिः प्रेत्यभावः ।
स च आत्मनः पूर्वदेहनिवृत्तिरुत्तरदेहसंभवः ॥ फलं पुनर्भोगः । भोगः सुखदुःखानुभवः ।
पीडा दुःखं । तच्चोक्तमेव । मोक्षोऽपवर्गः । स चैकविंशतिभेदभिन्नस्य दुःखस्यात्यंतिकी निवृत्तिः ।
एकविंशतिभेदास्तु । शरीरं षडिंद्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेति । गौणभेदात् ।
सुखं ^दुःखानुषंगात् । अनुषंगोऽविनाभावः । सेवायमुपचारः । मधुनि विषसंयुक्ते मधुनोऽपि

दुःखा

षपक्षनिक्षेपवत्॥ स पुनरपवर्गः कथं॥ उच्यते॥ शास्त्राद्विदितपदार्थतत्त्वस्य विषयदोषदर्शनेन विर
क्तस्य मुमुक्षोरात्मध्यायिनो ध्यानपरिपाकवशात् साक्षात्कृत आत्मनः क्लेशहीनस्य निष्कामक
र्मानुष्ठानादनागतधर्माधर्मावनार्जयतः पूर्वोपात्तं च धर्माधर्मप्रचयं योगप्रभावाद्विदित्वा
समाहृत्य भुंजानस्य पूर्वकर्मनिवृत्तौ वर्तमानशरीरापगमे अपूर्वशरीराभावात्॥ एकविंशतिदुःख
संबंधेन भवति॥ कारणाभावात्॥ सोयमेकविंशतिप्रभेददुःखहानिर्मोक्षः॥ अयमेवापवर्ग इति
इदानीं संशयमाह॥ एकस्मिन् धर्मिणि नानार्थविमर्शः संशयः॥ स च त्रिविधः॥ समानधर्मदर्श
नजो विप्रतिपत्तिजो ऽसाधारणधर्मजश्चेति॥ तत्र समानधर्मदर्शनजो यथा॥ स्थाणुर्वा पुरुषो
वेति एकस्मिन् पुरोवर्तिनि द्रव्ये स्थाणुत्वनिश्चायकं वक्रकोटरादिकं पुरुषत्वनिश्चायकं वा शि
रःपाण्यादिकं विशेषमपश्यतः स्थाणुपुरुषयोः समानधर्ममूर्द्ध्वत्वादिलक्षणं पश्यतः पुरुष

स्य भवति संशयः॥ किमयं स्थाणुः स्यात्पुरुषो वेति। द्वितीयस्तु संशयो विशेषादर्शने विप्रतिपत्ति-
जः॥ यथा किमयं शब्दो नित्य उताऽनित्य इति॥ तथाहि॥ कश्चिद्ब्रूते शब्दो नित्य इति। अपरोऽनित्य इ-
ति। तयोर्विप्रतिपत्तौ विशेषमपश्यतो मध्यस्थस्य पुंसो भवति संशयः। शब्दो नित्योऽनित्यो वेति॥
साधारणधर्मदर्शनजस्तु संशयो यथा॥ नित्यादनित्याच्च व्यावृत्तेन भूमात्रसाधारणेन गंधवत्त्वेन
विशेषमपश्यतो भुवि नित्यत्वाऽनित्यसंशयः। तथाहि। सकलनित्यव्यावृत्तेन गंधवत्त्वेन योगात्कि-
मनित्या उत सकलानित्यव्यावृत्तेन गंधवत्त्वेन नित्या भूरित्येवं संशयः। येन प्रयुक्तः पुरुषः प्रवर्तते त-
त्प्रयोजनं। तच्च सुखदुःखावाप्तिहानी। तदर्थो हि प्रवृत्तिः पुरुषस्य। वादिप्रतिवादिनोः संप्रतिपत्तिविषयो
दृष्टांतः। स च द्विविधः। एकः साधर्म्यदृष्टांतः। यथा धूमवत्त्वस्य हेतोर्महानसमिति। द्वितीयस्तु वैधर्म्य-
दृष्टांतः। यथा तस्यैव हेतोर्महाह्रदमिति। प्रामाणिकत्वेन अभ्युपगतोऽर्थः सिद्धांतः। स चतुर्विधः। सर्वतंत्र

सरस्व हैकम

तर्क०
७१

प्रतितंत्राधिकरणाभ्युपगमसिद्धांतभेदात्। तत्र प्रथमो यथा। धर्मिमात्रसद्भावः। द्वितीयो यथा। नैयायिकम
स्य मन इंद्रियं। तच्च समानतंत्रे वैशेषिके सिद्धं। तृतीयो यथा। क्षित्यादिकर्तृत्वसिद्धौ कर्तुः सर्वज्ञत्वं। चतुर्थो
यथा। जैमिनीयस्य विचारो यथा तथा भवतु तावच्छब्दो गुण इति। अनुमानवाक्यैकदेशा अवयवाः। ते च प्र
तिज्ञाद्यः पंच। तथा च न्यायसूत्रं। प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा इति तत्र साध्यवि
शिष्टधर्मिप्रतिपादकं वचनं प्रतिज्ञा। यथा पर्वतो वह्निमानिति। पंचम्यंतं तृतीयांतं वा लिंगप्रतिपाद
कं वचनं हेतुः। यथा धूमवत्त्वादिति। सव्याप्तिकं दृष्टांतवचनमुदाहरणं। यथा यो यो धूमवान् स स वह्निमा
न् यथा महानसः। पक्षे लिंगस्योपहार उपनयः। यथा चायं धूमवान् तथा चायमिति वा। पक्षे साध्योपसंहा
रो निगमनं। यथा तस्माद्वह्निमानिति तस्मात्तथेति वा। एते च प्रतिज्ञाद्यः पंच अनुमानवाक्यस्य अव
यवाः। न तु समवायिकारणं। शब्दस्याकाशसमवेतत्वात्। तर्कः प्रसंगः परानिष्टप्रतिपादकरूपः।
स च सिद्धव्याप्तिकयोर्व्याप्यांगीकारे व्यापकप्रसंजनं। यथा यदि अत्र घटो भविष्यत् तर्हि तलमिवाद्र

धर्मयो

वा५स५

राम
७१

स्यतेति। सचायं तर्कः प्रमाणानामनुग्राहकः। तथाहि। अयं पर्वतः अग्निरुतानग्निरिति संदेहानंतरं
यदि कश्चिन्मन्यते अयमग्निरयमिति। तदा तं प्रति यद्यनग्निरभविष्यत्। अनग्निकत्वाद्धूमोपि अ
भविष्यदिति अधूमत्वस्य प्रसंजनं क्रियते। स एवैष प्रसंगस्तर्क इत्युच्यते। अयं च प्रवर्तमानस्य धूम
लिंगस्य अनुमानस्य विषयत्वं जनयति। अनग्निमत्वप्रतिक्षेपात्। अतोऽनुमानस्य भवत्यनुग्राहकः इ
ति। अत्र कश्चिदाह। तर्कः संशयांतर्भवतीति तन्न। एककोटिविषयत्वात्तर्कस्य। निर्णयोऽवधारणंज्ञानं। निश्चयः ५
तच्च प्रमाणफलं। तत्त्वबुभुत्सोः कथावादः। स च अष्टनिग्रहाणां अधिकरणं। ते चन्यूनाधिकापसि
द्धांतहेत्वाभासादिपंचकं चेत्यष्टौ निग्रहाः। उभयसाधनवती विजिगीषुकथा जल्पः। स च यथासंभ
वं सर्वनिग्रहाणां अधिकरणं। परपक्षे दूषिते स्वपक्षसाधनप्रयोगावसानश्च जल्प एव। स्वपक्षस्था
पनाहीनो वितंडा। परपक्षदूषणमात्रावसाना। नास्य वैतंडिकस्य स्थाप्यः स्वपक्षोऽस्ति। कथा तु नानाव

ठक सर्वेभिः परपक्षप्रतिपादकवाक्यसंदर्भः ।। उक्तानां पक्षधर्मत्वादिरूपाणां मध्ये एकेनापि रूपेण हीना अ
हेतवः । तेपि कतिपयरूपयोगाद्धेतुवदवभासमाना हेत्वाभासाः । ते चासिद्धविरुद्धानैकांतिकप्रकरण
समकालात्ययापदिष्टभेदात्पंचैव । अन्योदयनेन व्याप्तस्य पक्षधर्मतया प्रतीतिः सिद्धिस्तदभावोऽसि
द्धिः इत्यसिद्धिलक्षणमुक्तं । तच्चैव यद्यपि विरुद्धादिष्वपि संभवतीति सांकर्यं प्रतीयते । तथापि यथा न
सांकर्यं । तथोच्यते । यो हि यत्र साधने दोषः पुरः परिस्फुरति समर्पयन् दुष्टिज्ञप्तौ स एव दुष्टिज्ञप्तिका
रणं दूषणमिति यावत् । नान्यः । तेनैव पुरस्फूर्तिकेन दुष्टौ ज्ञापितायां कथापर्यवसाने जाते तदुपजीविनो
ऽन्यस्यानुपयोगात् । तथा च सति यत्र विरुद्धो विपर्ययव्याप्त्याख्यो दुष्टिज्ञप्तिकारकः स एव विरुद्धो हे
त्वाभासः । एवं यत्र व्यभिचारादयस्तथाभूतास्ते अनैकांतिकादयः । यत्र तु पुनर्व्याप्तिपक्षधर्मतावि
शिष्टहेतुस्वरूपस्याभावेन सर्वोक्तास्ते असिद्धादयः दुष्टिज्ञप्तिकारका इति यावत् । तथाभूतः सो   राम
सिद्धस्त्रिविधः । सॅ × आश्रयासिद्धस्वरूपासिद्धव्याप्यत्वासिद्धभेदात् । तत्र यस्य हेतोराश्रयो नावग   ३२

तथाचोक्तं भाष्यकृता। ६ कार्यत्वादिति हेतुराश्रयासिद्धः॥२

ष्यते स आश्रयासिद्धः। यथा गगनारविंदं सुरभि अरविंदत्वात्। अत्र हि गगनारविंदमाश्रयः स चना
स्त्येव॥ अयमपि आश्रयासिद्धः। तथाहि। घटो ऽनित्यः कार्यत्वात्। पटवत्। ननु आश्रयस्य सत्वात्
सिद्धसाधनत्वं स्यात्। सिद्धस्य घटानित्यत्वस्य साधनात्। नैवं न हि स्वरूपेण कश्चिदाश्रयो भ
वति अनुमानस्य। किंतु संदिग्धत्वेन। नानुपलब्धे न निर्णीते ऽर्थे [illegible] न्यायः प्र
वर्तते॥ [illegible] नित्यत्वसंदेहो ऽस्ति। अनित्यत्वस्य निश्चितत्वात्। नै यद्यपि स्वरूपेण घटो वि न५
द्यते। तथापि ×अ× अनित्यत्वसंदेहाभावात्। नासावाश्रयः इत्याश्रयासिद्धत्वाद्धेतुः। स्वरूपा
सिद्धस्तु उच्यते। यो हेतुराश्रये नावगम्यते। तथा सामान्यं अनित्यं कृतकत्वादिति। कृतकत्व
हेतुराश्रये सामान्ये नास्त्येव। भागासिद्धो यथा। अनित्यः शब्दः प्रयत्नानंतरीयकत्वात्। शब्दस्य
अनित्यत्वं साध्यं। प्रयत्नानंतरीयकत्वादिति हेतुः। तत्र सर्वेषां शब्दानां आघाषाब्दस्य प्रयत्नानंतरी

अपि तु संदिग्धे ऽर्थे न्यायः प्रवर्तते। ४ नत्र घटे ऽ

यकपुरुषव्यापारोस्ति। शब्दजनितशब्देनास्तीति। भागासिद्धो हेतुः। आद्यशब्दे आत्मनःसंयोगजनित
ज्ञानादिक्रमेण प्रयत्नानंतरीयकत्वं पुरुषव्यापारोवर्त्तते। ननु शब्दजेषु। इति हेतोः पक्षैकदेशावर्त्तित्वं।
भागासिद्धोपिस्वरूपासिद्ध एव। [illegible] पृथिव्यादयश्चत्वारः परमाणवो
नित्या गंधवत्वादिति। गंधवत्वं पक्षीकृतेषु सर्वेषु नास्ति। पृथिवीमात्रवृत्तित्वात्। अत एव भागे स्वरू
पासिद्धत्वं। तथान्ये विशेषणासिद्ध विशेष्यासिद्धासमर्थविशेषणासिद्धासमर्थविशेष्यासिद्धादयः।
स्वरूपासिद्धभेदाः। तत्र विशेषणा×सी×सिद्धो यथा। शब्दो नित्यः द्रव्यत्वे सति अस्पर्शवत्वात्।
तत्र द्रव्यत्वविशिष्टमस्पर्शवत्वं हेतुः। नास्पर्शवत्वमात्रं। शब्दे द्रव्यत्वं नास्ति गुणत्वात्। अतो विशेष
णासिद्धः। न चासति विशेषणे द्रव्यत्वे तद्विशिष्टमस्पर्शवत्वमस्ति। विशेषणाभावे विशिष्टस्याप्यभावा
त्। यथा दंडमात्राभावे पुरुषमात्रसत्वेपि दंडविशिष्टपुरुषस्याभावः॥ तेन सत्यपि अस्यास्पर्शवत्वेपि

शिष्टस्य हेतोरभावात्। स्वरूपासिद्धत्वं। विशेष्यासिद्धो यथा। शब्दो नित्यः अस्पर्शवत्वे सति द्रव्यत्वाद्
ति। अत्रापि विशिष्टो हेतुः। न च विशेष्याभावे विशिष्टस्वरूपमस्ति। विशिष्टस्य हेतुरपि नास्त्येव। अस
मर्थविशेषणासिद्धो यथा। शब्दो नित्यः। गुणत्वे सति अकारणत्वात्। अत्र विशेषणस्य नोक्तं किंचित्सा
मर्थ्यं अस्तीति असमर्थविशेषणता। विशेष्यस्याकारणत्वस्यैव नित्यत्वसाधनसामर्थ्यात्। अ
तोऽसमर्थविशेषणं। स्वरूपासिद्धस्तु विशेषणाभावे विशिष्टस्याभावात्। ननु विशेषणं गुणत्वं
तत्र प्राद्येऽस्त्येव। तत्कथं विशेषणाभावः। सत्यं। अस्त्येव गुणत्वं किंतु न तद्विशेषणं। तदेव हि हेतोर्वि
शेषणं भवति यद्व्यवच्छेदे न प्रयोजनवत्। गुणत्वं च निष्प्रयोजनमतो समर्थमित्युक्तमेव। असमर्थवि
शेष्यो यथा॥ तत्रैव तद्यस्येन [illegible] शब्दो नित्यः। अकारणत्वे सति गुणत्वात्। अत्र तु विशे
षणमात्रस्यैव नित्यत्वसाधने समर्थत्वाद्विशेष्यमसमर्थं। स्वरूपासिद्धस्तु विशेष्याभावेऽपि विशिष्टाभा

सिद्धो २

तर्क०का
३४

वात्। विशिष्टस्य हेतुत्वे नोपपादनात्। शेषं पूर्ववत्। व्याप्यत्वासिद्धस्तु स एव। यत्र हेतौ व्याप्तिर्नावग
म्यते। स द्विविधः। एकः साध्येनासहचरितः। अपरस्तु सोपाधिकसाध्यसंबंधः। तत्र प्रथमो यथा। य
त्सत्तत्क्षणिकं। यथा जलधरः संश्चायं विवादास्पदीभूतं शब्दादिरिति। अत्र हि शब्दादिः पक्षः। तस्य
क्षणिकत्वं साध्यं। सत्वं हेतुः। न चास्य हेतोः क्षणिकत्वेन सहव्याप्तौ प्रमाणमस्ति। इदानीं उपाधि
सहितो यो व्याप्यत्वासिद्धः स प्रदर्श्यते। तद्यथा। स श्यामो मैत्रीतनयः। मैत्रीतनयत्वात्। परिदृश्यमा
न मैत्रीतनयस्तोमवत्। अत्र मैत्रीतनयत्वे न श्यामत्वं साध्यं। तेन च मैत्रीतनयत्वं न श्यामत्वे प्रयो
जकं। किंतु शाकाद्याहारपरिणाम एव प्रयोजकः। प्रयोजकश्चोपाधिरित्युच्यते। अतो मैत्रीतनयत्व
स्य श्यामत्वेन संबंधे शाकाद्याहारपरिणाम उपाधिः। यथाग्नेर्धूमसंबंधे आर्द्रेन्धनसंयोगः। अतो
सोपाधिसंबंधात् व्याप्तिर्नास्ति इति व्याप्यत्वासिद्धोयं मैत्रीतनयत्वादिति हेतुः। तथा उपरोदिव्या

राम
३४

व्याप्यत्वासिद्धः। यथा क्रतुत्वं तद्वर्त्तिनी हिंसा। अधर्मसाधनं हिंसात्वात्। क्रतुबाह्यहिंसावत्। न चात्रापि हिंसा
त्वं अधर्मप्रयोजकं। किंतु निषिद्धत्वमुपाधिरिति। इत्थं च उपाधिसद्भावात्। व्याप्यत्वासिद्धोयं हिंसात्वं हेतुः।
ननु साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिरिति उपाधिलक्षणं। तच्चात्र निषिद्धत्वे नास्तीति कथं
निषिद्धत्वमुपाधिरिति चेन्न। निषिद्धत्वे उपाधिलक्षणस्य विद्यमानत्वात्। तथा हि। साध्यस्य अधर्म
स्य व्यापकं निषिद्धत्वं। यत्र यत्राधर्मत्वं तत्र तत्रावश्यं निषिद्धत्वस्य विद्यमानत्वात्। न च यत्र यत्र हिंसात्वं
तत्रात्र निषिद्धत्वं। क्रतुत्वंगहिंसायां व्यभिचारत्वात्। अत्र क्रतुत्वंगहिंसायां हिंसात्वं अस्ति। न निषिद्धत्वमिति।
तदेवं द्विविधो ऽसिद्धो दर्शितः। इदानीं विरुद्धः कथ्यते। साध्यविपर्ययव्याप्यो विरुद्धः। यथा नित्यः शब्दः
कृतकत्वादिति। अत्र हि नित्यत्वं साध्यं। तद्विपर्ययेणानित्यत्वेन कृतकत्वं व्याप्तं। यत्कृतकत्वं तद्[illegible]
तत्सर्वं अनित्यमेव। अतः साध्यविपर्ययव्याप्यत्वात् कृतकत्वं हेतुर्विरुद्धः। साध्यसंशय हेतुरने

कांतिकः। सव्यभिचारश्चेति च। स द्विविधः। साधारणानैकांतिको ऽसाधारणानैकांतिकश्चेति। तत्र प्रथ
मः सपक्षविपक्षवृत्तिः। यथा शब्दो नित्यः प्रमेयत्वादिति। अत्र प्रमेयत्वं हेतुः सपक्षे नित्ये विपक्षेऽनित्ये
ऽपि विद्यते। सर्वस्यापि प्रमेयत्वादिति। तस्मात्प्रमेयत्वादिति साधारणोऽनैकांतिको हेतुः। साधारणोऽनैका
तिकस्तु स एव। यः सपक्षविपक्षाभ्यां व्यावृत्तः पक्षमात्रवृत्तिः। यथा भूर्नित्या गंधवत्वात्। अत्र गंधवत्वं हे
तुः सपक्षान्नित्याद्व्योमादेर्विपक्षादनित्याज्जलादेर्व्यावृत्तः। गंधवत्वस्य पृथिवीमात्रवृत्तित्वादिति।
तव्यभिचारस्तु वक्ष्यते। संभवत्सपक्षविपक्षस्य हेतोः [illegible] सपक्षवृत्तित्वे सति विपक्षाद्व्यावृत्तिरेवानि
यमो गमकत्वात्। तस्यैव तन्नियमाभावो व्यभिचारः। स च द्विधा संभवति सपक्षविपक्षयोर्वृत्तौ ताभ्यां
व्यावृत्तौ। यस्य प्रतिपक्षभूतं हेत्वंतरं विद्यते। स प्रकरणसमः। स एव सत्प्रतिपक्ष उच्यते। शब्दो नित्योऽनि
त्यधर्मानुपलब्धेरिति। अत्र च विपरीतार्थसाधकं समानबलमनुमानांतरं प्रतिपक्ष इत्युच्यते। यत्पुन

पं२

अ२

क्षणिकं तस्य भावो क्षणिकत्वं प्रत्यभिज्ञानात्मकेन प्रत्यक्षेणैव परिच्छिन्नं | स एवायं घटो यम् मया पूर्वं दृष्ट इत्युद्ध
दुति | प्रत्यभिज्ञया पूर्वविषयानुभवजनितसंस्कारसहकृतेंद्रियप्रभवया पूर्वापरकालीनस्य घटस्य स्थायि
त्वपरिच्छेदादिति || एतेऽसिद्धादयः पंचहेत्वाभासाः || यथायथं पक्षधर्मत्वादिरूपरहितत्वाद्धेतवः | स्वसाध्यं न
साधयंति | येषि लक्षणस्य अतिरेकि हेतोस्त्रयः | अतिव्याप्तिरव्याप्तिरसंभवदोषास्तेष्वेवांतर्भवंतीति न तु
पंचभ्योऽधिकाः || तथा हि | अतिव्याप्तिर्व्याप्यत्वासिद्धेः | विपक्षाद्व्यावृत्त्यभावात् | सोपाधिकत्वाद्वा | यथा
गोलक्षणस्य पशुत्वस्य | नो तु हि सास्नादिमत्त्वं प्रयोजकं पशुत्वं न तथा | तथाऽव्याप्तिर्भागासिद्धत्वं | यथा गोल
क्षणस्य शबलेयत्वस्य | एवमसंभवोऽपि स्वरूपासिद्धेः || यथा गोलक्षणस्य एकशफत्वेति | अभिप्रायांतरेण प्र
युक्तस्य शब्दस्यार्थांतरं प्रकल्प्य दूषणाभिधानं छलं || यथा नवकंबलोऽयं देवदत्त इति वाक्ये नूतनाभिप्रायेण प्र
युक्तस्य नवशब्दस्यार्थांतरमाशंक्य कश्चिद्दूषयति | नास्य नव कंबलाः संति दरिद्रत्वात् | नह्यस्य द्वयमावसं

२ घटवत्। [illegible] यस्य परमाणुसाधकानुमानं २
अतान जेष्ट [illegible]

रतुल्यबलं न तत्प्रतिपक्षः। तथाहि। विवक्षितसाधनानुमानं त्रिविधं भवति। उपजीव्यमुपजीवकमनुभयं वे
ति। तत्राद्यं बाधकं बलवत्। यथा। अनित्यः परमाणुर्मूर्तत्वाद्घटवदिति। नहि प्रमाणेनागृह्यमाणे धर्मिणि
परमाण्वाख्ये अनित्यत्वानुमानमिदं संभवति। आश्रयासिद्धेः। अनेनानुमानेन परमाणुग्राहकस्य प्रमाण
त्वमनुज्ञातं। अन्यथा स्याश्रयासंभवात्। तस्मादुपजीव्यं बाधकमेव। उपजीवकं तु दुर्बलत्वाद्बाध्यमेव।
यथेदमेवानित्यत्वानुमानं। तृतीयस्तु प्रतिपक्षस्तुल्यबलत्वात्। यस्य प्रत्यक्षादिप्रमाणेन पक्षे साध्या
भावः परिच्छिन्नः स कालात्ययापदिष्टः स एव बाधितविषय इत्युच्यते। यथा अग्निरनुष्णः कृतकत्वाज्ज
लवत्। अत्र कृतकत्वं हेतुः तस्य च यत्साध्यमनुष्णत्वं तस्याभावः प्रत्यक्षेणैव परिच्छिन्नः। त्वगिंद्रियेणाग्नेरु
ष्णत्वपरिच्छेदात्। तथा परोपि कालात्ययापदिष्टः। यथा क्षणिकत्वे साध्ये प्रागुक्तं सत्वं हेतुः। तस्यापि यत्साध्यं

मा त्सर्येन

ध्येते। कुतो न वेति। सववारी छलवादितया जीयते। असदुत्तरं जातिः। सा चउत्कर्षसमादिभेदेन बहुविधापि विस्त
रभयान्नेहोच्यते॥ तत्र व्याप्तेन दृष्टांतगतधर्मेण साध्येऽव्यापकधर्मस्यापादानमुत्कर्षसमाजातिः॥ यथा शब्दो
ऽनित्यः कृतकत्वात्। घटवदिति प्रयुक्ते कश्चिदाह। यदि कृतकत्वेन हेतुना घटवच्छब्दोऽनित्यः स्यात्। तेनैव
हेतुना घटवदेव शब्दः सावयवः स्यात्। अपकर्षसमा तु जातिरुच्यते। दृष्टांतगतेन धर्मेण व्याप्तेनाव्यापक
स्य धर्माभावस्यापादानमपकर्षसमाजातिः। यथा पूर्वस्मिन्नेव अनुमाने कश्चिदेवमाह। यदि कृतकत्वेन हे
तुना घटवच्छब्दोऽनित्यो न स्यात्। तदा तेनैव हेतुना घटवच्छब्दोऽश्रावणो न स्यात्। न हि घटः श्रावण इति।
पराजयहेतुर्निग्रहस्थानं। तच्चाज्ञानाधिकापसिद्धांतार्थांतराप्रतिभामतानुज्ञाविरोधादिभेदस्यात् ब
हुविधमपि विस्तरभयान्नेह कृत्स्नमुच्यते। यत्तु विवक्षितार्थे किंचिद्धीनं तन्न्यूनं। तदेव किंचिदधिकमधिकं
सिद्धांतादपभ्रंशोऽपसिद्धांतः। प्रकृतेनानभिसंबद्धार्थवचनमर्थांतरं। उत्तरापरिस्फूर्तिरप्रतिभा। पराभि

मतस्यार्थस्य स्वप्रातिकूल्यस्य स्वयमेवाभ्यनुज्ञानं स्वीकारो मतानुज्ञा। इष्टार्थभिन्नोऽपि विरोधः। इहास्यं
तमुपयुक्तानां स्वरूपमेतैरस्माभिरपेक्ष्य प्रतिपादनं॥ यदन्यन्निष्प्रयोजनं तदलक्षणमदोषाय एतावतैव बा
लव्युत्पत्तिसिद्धिः॥ ॥इति श्रीकेशवमिश्रविरचिता तर्कपरिभाषा समाप्ता॥ शुभं भवतु॥ ॥
शके वैद्योपनामक श्रीनिवासेनालेखीदं पुस्तकं॥ श्री॥ ॥श्रीवक्रतुंडो जयति॥